सिंघी जैनशास्त्र शिक्षापीठ

सिंघी जैन ग्रन्थमाला–ग्रन्थांक ७६

आदि प्रधान संपादक : स्व. आचार्य जिनविजय मुनि

प्रधान संपादक : महामहोपाध्याय प्रा. जयन्तकृष्ण हरिकृष्ण दवे,
एम. ए., एल्एल्. बी : विद्यावाचस्पति

मानार्ह नियामक, भारतीय विद्या भवन

महाकवि श्री रामचन्द्रविरचित

रघुविलासनाटकोद्धारः

प्रास्ताविकम्

महामहोपाध्याय प्रा. जयन्तकृष्ण हरिकृष्ण दवे

भारतीय विद्या भवन, बम्बई–४०० ००७

१९८२]

सर्वाधिकाराः सुरक्षिताः

[मूल्य रु. २५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वर्गवासी साधुचरित श्रीमान् डालचन्दजी सिंघी



बाबू श्री बहादुरसिंहजी सिंघी के पुण्यश्लोक पिता

जन्म : वि. सं. १९२१, मार्ग. वदि ६ 卐 स्वर्गवास : वि. सं. १९८४, पौष सुदि ६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दानशील-साहित्यरसिक-संस्कृतिप्रिय

स्व. बाबू श्री बहादुरसिंहजी सिंघी

अजीमगंज-कलकत्ता

जन्म : ता. २८-६-१८८५] [मृत्यु : ७-७-१९४४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

SINGHI JAIN ŚĀSTRA ŚIKSĀPĪTHA
SINGHI JAIN SERIES—76

FOUNDER GENERAL EDITOR — *Late* ACHĀRYA JINA VIJAYA MUNI

GENERAL EDITOR
Mahāmahopādhyāya Prof. JAYANTAKRISHNA HARIKRISHNA DAVE
M.A., LL.B., Vidyāvāchaspati.
Hon. Director, BHARATIYA VIDYA BHAVAN

RAGHUVILĀSA NĀTAKODDHĀRAḤ

OF

MAHĀKAVI SHRI RAMACHANDRA

With a General Introduction
By
Mahāmahopādhyāya Prof. JAYANTAKRISHNA HARIKRISHNA DAVE

1982
BHARATIYA VIDYA BHAVAN
KULAPATI MUNSHI MARG
BOMBAY 400 007

Jain Education International For Private & Personal Use Only www.jainelibrary.org

All Rights Reserved

First Edition — 1982

Price Rs. 25/-

PRINTED IN INDIA

By V. Varadarajan at Associated Advertisers & Printers, 505, Tardeo Arthur Road, Bombay-400 034, and Published by S. Ramakrishnan, Executive Secretary, Bharatiya Vidya Bhavan, Kulapati Munshi Marg, Bombay-400 007.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिंघी जैनशास्त्र शिक्षापीठ

सिंघी जैन ग्रन्थमाला-ग्रन्थांक ७६

आदि प्रधान संपादक : स्व. आचार्य जिनविजय मुनि

प्रधान संपादक : महामहोपाध्याय प्रा. जयन्तकृष्ण हरिकृष्ण दवे,
एम. ए., एल्एल्. बी : विद्यावाचस्पति

मानार्ह नियामक, भारतीय विद्या भवन

महाकवि श्री रामचन्द्रविरचित

रघुविलासनाटकोद्धारः

प्रास्ताविकम्

महामहोपाध्याय प्रा. जयन्तकृष्ण हरिकृष्ण दवे

भारतीय विद्या भवन, बम्बई-४०० ००७

१९८२]

सर्वाधिकाराः सुरक्षिताः

[मूल्य रु. २५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

GENERAL EDITOR'S INTRODUCTION

The Bharatiya Vidya Bhavan has so far published 53 volumes in the *Singhi Jain Series*. When late Muni Jinavijayaji had been to Santiniketan in 1931 December he had started the Singhi Jain Grantha-Mala with the very liberal financial assistance of late Shri Bahadursimhaji Singhi.[1] When the Bharatiya Vidya Bhavan was started in 1938, late Shri Muniji joined the Bhavan at the special invitation of late Shri Munshiji and entrusted the Singhi Jain Series to the Bhavan. Since then the Bhavan has brought out this series with meticulous care and this prestigious series has received respect of scholars and international recognition. Late Muniji remained its General Editor till his death which took place on June 3, 1976.

II

Muniji was born on January 27, 1888 A.D., at Rupaheli in Mewar in Rajasthan. His parents were Vriddhisimhaji and Rajkumari. They were Rajput farmers and Muniji's original name was Kisan Singh. At a young age he joined the Sect of a Baba, then a Marwari Jain monk and then ultimately was initiated by Muni Sundervijayaji and named Jinavijayaji. With keenness and industry he devoted himself entirely to exploring Bhandaras and manuscripts and reading, editing and making research. He went to Jaisalmer, Baroda, Bombay and Poona. Gandhiji invited him to Gujarat Vidyapith at Ahmedabad. He gave up the costume of a monk to pursue more vigorously his research plans. In 1928 he went to Germany at the invitation of Dr. Jacobi. Coming back to India, he had joined the Dandi March at Gandhiji's call. Thereafter, he joined Santiniketan at Gurudev Tagore's invitation and it was here as stated above in 1931 that this Singhi Series was started.

After Muniji joined the Bhavan, this series has become a very prestigious and integral part of the Bhavan. Even though he went to Jaipur as Director to serve his native place, the Singhi Series was purposely and continuously kept entrusted to the Bhavan by Muniji. In Jaipur he established a Research Institute and started another series. He then went to Chanderia near Chittor and started a Sarvodaya Sadhana Ashram. At Udsipur he laid foundation of Bhamasa Bharati Mandir and Shri Haribhadra Suri Smriti Mandir. He received the co-operation of a number of learned scholars and has edited more than a hundred rare works. He delivered Thakkar Vasanji Vyakhyanamala of the Bombay University,

1. Regarding the life of the founder of the Singhi Series, see the Prasasti by Muniji in Sanskrit in Kumarapalacharitra Sangraha and other volumes of this series.
2. Regarding Muniji's life, see his Sanskrit Prasasti in Kumarapalacharitra Sangraha and other volumes of this series as also the article by Pandit Sukhlaji in Darsan and Chintan, pp. 94 ff.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

was awarded Padmasri by the Government of India, was made a member of the German Oriental Society and was the President of the Gujarat Itihasa Parishad.

He remained the Hon. Director of the Bhavan till 1954 when he formally retired to work more vigorously at Jaipur and thereafter I was asked to be the Hon. Director. As pointed out above he moved from place to place, from time to time and subsequently on account of age, failing health, and more particularly his failing eye-sight, the tempo of publication of the Singhi Series became slow, more particularly because he was keen to write exhaustive introduction to each publication himself. In spite of repeated requests from me, it was not possible for him to write these introductions in view of the aforesaid difficulties. However, the Bhavan was able to bring out 2 volumes in 1966 and 1967 by Dr. Upadhye and Tarunaprabhacharya's Shadavasyaka-balavabodhavritti edited by late Dr. Prabodh Bechardas Pandit in 1976. The last mentioned work contains in detail an exhaustive introduction by Muniji written at my repeated special request and gives the history of this Series. Even though it is named as Singhi Jain Series, Muniji has included in it many non-Jain works also. The Series has gained international recognition and is referred to as a prestigious publication in the Report of the Sanskrit Commission appointed by the Government of India.

III

Rāmachandra Suri, the author of *Raghuvilāsanatākam* and *Raghuvilāsanatakoddhara,* flourished during the reign of the Chālukya Kings Siddharāja Jayasimha and Kumārapāla of Gujarāt. He was born in S.Y. 1145, near about the capital Anahillapur Pātan. He was initiated as Muni in S.Y. 1150, became a Suri in S.Y. 1166 and expired in S.Y. 1230 at an advanced age of 85. He was the principal disciple of the famous Acharya Hemachandra Suri.[1] Another version says that he was born in S.Y. 1156.

The reign of Gujarat Chalukyas from the 11th to 13th centuries was a glorious and very prosperous period. Siddharaja had conquered Malwa. Scholars from many parts of India, including Kashmir, had come to the capital and found royal support. Even though Saivism was the faith of kings who called themselves Umapati-Labdha-Prasada, Jainism was equally favoured and royal grants were made available for both. There was religious tolerance.

Hemachandra Suri's place in the reign of Siddharaja was very high but in the reign of Kumarapala his relation with the ruler was that of Teacher and Disciple. He was born in the Modh Vanik Community in Dhandhuka on Kartik Purnima S.Y. 1145, came in contact with Deva-

1. Cf. Sanskrit Introduction by Pandit Lalchand Gandhi on Natya Darpana, Published by G.O.S.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

chandra Suri at the age of five, was initiated at the age of eight and became Suri at the age of twentyone. His father was Chachcha — and from the use of the words "Mithya Vadin" and "Siva Nirmalya" used in connection with him,[2] Shri Rasiklal Parikh states that he might be a Maheshwari — but Hemachandra's mother Pahini and maternal uncle Nemi were Jains.

Hemachandra's original name was Changadeva, on initiation he was called Somachandra and on becoming a Suri he was called Hemachandra. He belonged to the Purnatalla-Gachchha. He came to Anahillapura Pattan when Siddharaja was ruling. His fame as a Saint and Scholar spread far and wide. Siddharaja invited him to his Court and his influence increased very much. After the conquest of Malwa, he composed the Siddhahema grammar at the desire of Siddharaja. Kumarapala came to Gadi at the age of 50. At Hemachandra's instance, he promulgated the Ordinance of "Amari" and prohibited the state from taking over the property on the death of a childless person. Kumarapala became "Parama-Arhat" Hemachandra composed new works on grammar, prosody, Dvyāsraya Kavya, on Alankara, Yogasastra, Tarka Sastra, Jinacharitas etc. He is compared with Mount Mandara churning the ocean of learning and rightly called Kali-Kala Sarvajna. His Vitaraja Stuti shows his breadth of vision and tolerance. List of his available works is given by Muni Punyavijayaji at pp. 82-3 of Shri Haima Saraswati Satra (G.S.P.). Mahatma Gandhi was another illustrious Modh Vanik and both Acharya Hemachandra Suri and he have preached Ahimsa in their own respective ways.

Kumarapala had a life full of ups and downs, of miseries and happiness and he had had many unpleasant and pleasant experiences. His life is described in detail by many Jain authors, giving the history of his family, birth, his life from childhood to death, how he acquired the kingdom, his administration, his views on religion etc. Hemachandra in the last five sargas of Sanskrit Dyasraya and in the eight sargas of Prakrit Dyasraya gives a poetic description of his life. In the Mahavira-Charitra of the Trishashti-Salaka-Purusha-Charitra, Kumarapala's description is given in the style of Bhavishya Purana. Maharajaparajaya drama of Yashpala describes how Kumarapala prohibited killing of animals, hunting, drinking and gambling. Kumarapala-Pratibodha of Somaprabha states how Hemachandra made Kumarapala pro-Jain.

Whether Kumarapala actually embraced Jainism or he merely adopted Jain ethics has been a subject of some controversy. That he was called Parama-Arhat and was highly indebted to and under the influence of Hemachandra is not doubted. Many Jain authors state that he actually took Jain Diksha. Prof. Rasiklal C. Parikh, in his introduction to Kavyanusasana p. 60, however states that if by conversion is meant that Kumarapala abjured the faith of his forefathers and gave up the worship

2. Prof. Rasiklal Parikh's Introduction to Kavyanushasana — P. 37.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

of Siva and other Puranic deities, it is contradicted by historical evidence. In the last canto of Sanskrit Dyasraya Kavya, we find Kumarapala distinctly mentioning his devotion to Siva, and secondly in the inscription of Bhava Brihaspati of the year V.S. 1259 — A.D. 1173, the last year of Kumarapala's reign, he is called "Maheswara Nrpagrani", the foremost of Maheswara Kings. From these references it becomes clear that though Kumarapala's mode of life was changed, that though the old way of worshipping with animal sacrifice was also completely given up, he did not cease to be a worshipper of Siva-the God of his forefathers. As against this view, Muni Jinavijayaji in his article on Rajarshi Kumarapala (Bharatiya Vidya 1940 I iii pp. 221 ff) and his introduction to Kumarapala-pratibodha holds a different view and states that Kumarapala formally embraced Jainism.

Jainism and Saivism were then two established religions and in Gujarat there were many respectable families where both were honoured equally. Many of the Vaisya Caste followed both. Followers of both religions were at the helm of the affairs of the State. Rituals in both religions were done through Brahmins only. The Kuladevata of both was the same. But generally speaking, the Raja Dharma was Saivism. The Raja Purohitas were Nagara Brahmins. But Jain Scholars frequently contacted the Kings and the latter gave them the same respect as to their Gurus. Siddharaja, known for his inclination for Saivism, had also got constructed the Jain Temple for Adinatha called Raya Vihara. Kumarapala had great inclination towards Jain ethics and respected Hemachandra as his friend, guide and philosopher. Hemachandra had also very liberal views on Religion and Philosophy. A story goes that a woman got her husband, attached to a concubine, transformed into a bull. Afterwards, she repented and desired him to be retransformed into a man. God Siva was passing that way and suggested a herb in that locality as a cure. She could not identify the herb and so one after the other she picked up various herbs in that locality and ultimately found the real herb. Hemachandra recited this story to Kumarapala and advised that in this Kali age one may get benefit by respecting all Darsanas with due devotion (Kayanusasana Introduction p. 45). Hemachandra's prayer to Siva is well-known. "Whatever you are by name and in whatever time, if you are free from Dosha and Papa — you are the same Lord, Oh, Bhagavan — and I pay my Namaskaras to you." This was the liberal view of the time.

Among the main disciples of Hemachandra were Ramachandra, Gunachandra, Mahendra Suri, Vardhamanagani, Devachandra, Udayachandra, Yashaschandra and Balachandra.

This Ramachandra Suri was a Mahakavi and was the Pattadhara and principal disciple of Hemachandra Suri. On account of his poetic ability, Siddharaja had given him the title of "Kavi-Katara-Malla."

Jain Education International For Private & Personal Use Only www.jainelibrary.org

When Hemachandra was first introduced to Siddharaja, at that time Ramachandra was his pupil. Ramachandra was a swift composer of verses (Sighra Kavi). It is said that Siddharaja once asked him as to why the days are longer in Summer. Ramachandra replied: "The dust raised by your victorious horses has reached heavenly Ganges, mud is created there, green grass grows thereon, Sun's horses while travelling during the day stop to eat that grass. That is why days are longer in Summer." Siddharaja was pleased with this reply. Ramachandra's description of Anahilla Patan was also picturesque. His reply to Poet Visveswara is also frequently quoted: He was famous for Samasya-Purti. Siddharaja had asked Hemachandra as to who would be his successor and Hemachandra had mentioned Ramachandra.

Ramachandra is described as author of Prabhandha Sataka. Some people think that he had composed 100 works. But Muni Jinavijayaji has pointed out in Puratatva Volume II Page 421 that at one place there is a reference to one single work of Ramachandra called Prabandha Sata describing the 12 kinds of Rupakas and that work is of the length of 5,000 verses.

In his introduction to two dramas Ramachandra refers to Prabhandha Sataka. It appears that Prabhandha Sataka is the name of a single work. Ramachandra has in co-authorship with his co-student Gunachandra written two works, (1) Natyadarpana on the Science of Dramaturgy and (2) Dravyalankara on Nyaya. On both these works they have written their own Vritti. In Natyadarpana Ramachandra refers to 11 dramas which he has written. The number of times in which they are referred to in Natyadarpana is mentioned here in the bracket. (I) Kaumudi Mitrananda Prakaran (1) (II) Nalavilasa Nataka (13), (III) Nirbhaya Bhima Vyayoga (I), (IV) Mallika Makaranda Prakarana (I), (V) Yadavabhyudaya Nataka (8), (VI) Raghuvilasa Nataka (14), (VII) Raghavabhyudaya Nataka (7), (VIII) Rohini Mriganka Prakarana (2) (IX) Vanamala Nataka (1), (X) Satya Harischandra Nataka (7) and (XI) Yaduvilasa (mentioned in the introduction of Raghu Vilasa).

Out of the 11 dramas Nalavilasa is published by the Gaekwad Oriental Series. Kaumudi Mitrananda was published by Muni Punyavijayaji on the basis of a single manuscript in 1917 A.D. through Atmaram Sabha, Bhavnagar. Nirbhaya Bhima Vyayoga was published by Yaso Jain Granthamala and Satya Harischandra Nataka was published by the Nirnaya Sagar press, Bombay. Ramachandra describes himself as Vidya Trayichana, that is, expert in grammar, logic and poetics. He does not imitate others or plagiarise. He has frequently stated that he loves freedom and independence. It seems he had lost his right eye. It is stated that Hemachandra had asked him to become Ek Drishti that is to follow with single-mindedness Jainism and therefore he became one-eyed man. Another version says that he found mistakes in the poem of Sripala and thereafter he lost his eye-sight.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Dravyalankara, a work of logic contains three Prakasas. In Natya Darpana, he discusses 12 kinds of Rupakas namely, Nataka, Prakarana, Natika, Prakarani, Vyayoga, Samavakara, Bhana, Prahasana, Dima, Utsrishtikanka, Ihamriga and Vithi. In Natya Darpana he quotes from 63 works, out of which about 44 are dramas. This shows his vast reading and versatility. He has also referred to Svapna-Vasavadatta and Daridra Charudatta of Bhasa. He has also given extracts from Devi Chandra Gupta of Visakha Deva, the author of Mudrarakshasa. That drama is helpful in reconstructing the history of Chandragupta. In addition to this, he is the author of Kumara Vihar Sataka, Sudha Kalasa (An Anthology of Subhashita), Haima-Brihad-Vritti-Nyasa and several stotras. He is proud of his own poetry; he follows the Vaidarbhi style. His language is simple, sweet and full of prasada. The fact that he is the author of several dramas shows that at that time there was an appreciative audience for such dramas. He has taken material from folk lore, mythology, history etc. He has also brought in the element of miracle in his dramas. Among his contemporaries he stands out as one of the most celebrated author and poet. He is only next to his Guru, Hemachandra. About his death, Jain authors have given the following version: When Kumarapala became old, he first went to Hemachandra Suri, along with his Jain Minister Abhada to discuss as to who should succeed him as the next king. At that time, Ramachandra, Gunachandra, Balachandra, and other disciples were present. Hemachandra advised that Pratapamalla, the King's daughter's son, should succeed Kumarapala. While Minister Abhada suggested that Kumarapala's brother's son Ajaypala should succeed him. Balachandra was a friend of Ajaypala. He broke the confidence of his Guru and conveyed to Ajaypala that he was not favoured by Hemachandra. After some time, Hemachandra died. Ramachandra consoled Kumarapala who was sorry on account of Hemachandra's death. It is said that Ajaypala poisoned Kumarapala and came to Gadi. It is also further said that thereafter he took vengeance on Ramachandra who had sided with Hemachandra. It is said that he was made to sit on a heated Iron or Copper Seat and thereby his death was caused. According to another version, Ramachandra composed Dodhaka Panchasati, while crushing his tongue by his teeth and died.

Gunachandra was another disciple of Hemachandra. He is the co-author with Ramachandra of Dravyalankar and Natyadarpana. Ramachandra was more versatile while Gunachandra preferred only serious subjects. Mahendra Suri was another disciple and he wrote Anekartha Kairavakara Kaumudi which is a commentary on Hemachandra's work and he wrote it in the name of Hemachandra. Another disciple Vardhamana Gani wrote a commentary of Kumara Vihara Prasasti. Devachandra wrote a drama called Chandralekha Vijaya Prakarana. Udayachandra and Yasaschandra were other disciples of Hemachandra. Balachandra who broke the confidence of his Guru, is said to be responsible for Rama-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

chandra's death and he subsequently went away to Malwa. He is stated to be the author of Snatasya, a well known Stuti.

Gujarat's contribution to Sanskrit literature is not meagre. Kapila Muni is stated to have flourished near Siddhapur. Nakulisa of Pasupata Darsana is said to belong to Karavan (Kayavaroha) near Vadodara. Nyaya and Vaiseshika Darsanas too are inclined to Saivism and said to belong to Gujarat. Devardhi Gani made the Jain canon recorded in book form at Vallabhipur. In that city, there were 18 sub-schools of Hinayana Budhism and the famous Budhist Saints Gunamati and Sthiramati also flourished here. Samba Panchasika is stated to have been composed by Lord Krishna's son Samba. Magha flourished in Bhimamala in the 7th Century. Dhaneswar's Satrunjaya Mahatmya and Bhatti's Ravanavadha also belong to this age. Bappabhatti and Siddharshi are other known authors. Vajrata and Uvvata were vedic scholars of Patan and Vadnagar. Dwadviveda and Vishnu were other well-known scholars. In the eleventh century came Hemachandra and his band of scholars. Vagbhata wrote Vagbhatalankar. Someswara, the Nagara poet of repute wrote Kirtikamudi, Surathtotsava and Ullagharaghava. Nanaka, Subhata, Arisimha, Amarachandra Suri, Vastupala, Prahladana-deva, Manikyachandra, Mallishena Suri the author of Syadvada Manjari, Achala Dwivedi the author of Nirnaya Dipaka, Devavimalagani, Yasovijayaji, Vijayalakshmi Suri — these are some of the prominent names of authors who have contributed significantly to Sanskrit literature and philosophy. (See Gujaratnu Sanskrit Sahitya: By Dr. A. B. Dhruva).

The first known Sanskrit drama of Gujarat is Karna Sundari of Poet Bilhana. This Karna Sundari is none but Mayanalla, the mother of Siddharaja. Yasaschandra wrote 2 dramas — one Mudita Kumudachandra and the other Rajimatiprabodha. But the foremost author of dramas of this time was our author under review Ramachandra Suri who wrote eleven dramas mentioned above. Another disciple of Hemachandra called Devachandra wrote Chandralekha. Vijayapala is the author of Draupadi-Swayamvara. Another Jain author called Ramabhadra wrote Prabhuddha-Rauhineya. Balachandra in 1221 A.D. wrote Karuna-Vajrayudha and poet Someswara wrote Ullagha-Raghava. Jayasimha Suri is the author of Hammiramada Mardana. Gangadhara in the 15th century wrote Gangadasa Pratapavilasa. Bhudeva Sukla's Dharmavijaya, Ravidasa's Pakhandakhandana, Ramakrishna Devaji's Gopalakelichandrika and Jagannatha's Bhagyamahodaya are some of the other dramas. In the 19th Century, Mahamahopaddhyaya Sankaralal wrote a number of Sanskrit dramas. Thus, from the 10th Century onwards, Gujarat has contributed more than 30 dramas out of which Ramachandra Suri alone has written 11 dramas. (For further details, see the article of Dr. Bhogilal J. Sandesara in Bharatiya Vidya 1940, I iii P.304 ff.)

As stated before, Natyadarpana is composed by two authors — Ramachandra and Gunachandra. They have written their own Vivritti or ex-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

planatory notes. In all there are 207 Karikas. It mainly relies on the Natya Sastra of Bharata Muni but the sphere of Natyadarpana is very much limited. The Natyasastra of Bharata in its 18th chapter, describes 10 Rupakas. Before Ramachandra, Dhananjaya had written a work on the ten Rupakas. The present work of Ramachandra, a protege of the Gujarat King, wrote this work Natyadarpana in competition with the work of Dhananjaya who was a Pandit in the court of the King of Malwa. There was at that time a keen rivalry between Malwa and Gujarat. Ramachandra refers to Dhananjaya about 13 times and has criticised him about 2 times. In several other definitions also, Ramachandra differs from Dhananjaya. Ramachandra also seems to have been acquainted with the work of Sagaranandi called Nataka-Lakshana-Ratnakosa and differs from him also at several places. At one place Ramachandra differs from Mammata also. In the matter of Rasa, he mainly relies on Abhinavagupta. Ramachandra has divided Rasas into 2 parts — some like Sringara etc. are Sukhatmaka while others like Karuna etc. are Duhkhatmaka.

Dhananjaya, being a Vaishnava, describes ten varieties of Rupaka, connecting them with the ten Avataras of God Vishnu. Similarly, Ramachandra Suri, being a Jain, intends to connect the 12 varieties of Rupaka with the 12 Angas of the Sacred Jain Scriptures. The work of Ramachandra is divided into 4 parts, each one called a Viveka. In the first part, only the Nataka is discussed. In the second, the remaining eleven varieties of Rupaka are discussed. In the third Vritti, Rasa etc. are delineated and the fourth part discusses certain general topics connected with Rupakas. Ramachandra has not only discussed Nataka variety of Rupaka fully but has also given detailed discussions of other varieties. His illustrations are also numerous. He has taken them from 63 works out of which eleven dramas are written by Ramachandra himself, Kalidasa, Bhavabhuti, Bhasa, Visakhadatta, Sriharsha and others are frequently quoted. Devichandragupta of Visakhadatta is helpful in reconstructing the history of the Guptas — a question arises whether Chandragupta married the widow of his brother Ramagupta. Bhasa's Swapna Vasavadatta and Charudatta dramas are also referred to (Charudatta is referred to as Daridracharudatta) but the verse quoted as from Swapna Vasavadatta is not found in the presently available text.

Raghuvilasa, his own drama, is described by Ramachandra as one of his four best dramas. Others of the best four are Raghavabhyudaya, Yadavabhyudaya and Nalavilasa.

Raghuvilasa is a Nataka while Kaumudi Mitrananda is a Prakarana.

Nataka is defined by Ramachandra as follows. It secures for us all the three Purusharthas viz. Dharma, Artha and Kama. In it, there are Ankas, Upaya, Dasa and Sandhi. Gods are helpful to the hero. It describes the life incidents of famous ancient kings. The hero is either Dhiroddhata or Dhirodatta, or Dhiralalita or Dhiraprasanta.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

In Nataka, the main story is famous in history but in Prakarana, the story is imaginary. In Nataka, the hero is some famous ancient king but in Prakarana, the hero is the creation of the author's imagination. In Prakarana, the hero is either a Vanik, or a Vipra or a Sachiva. Sachiva means one who looks after the affairs of the State. Thus, the hero here can be either a minister or even the commander of the Army. In Prakarana, divine beings do not come on the stage. The hero suffers from many difficulties. The heroine is of middle-class family. There are Dasas, merchants, and Vitas also in Prakarana. Ramachandra gives seven varieties of Prakarana.

BHARATIYA VIDYA BHAVAN
Bombay-400 007

October 8, 1981

JAYANTAKRISHNA H. DAVE
Hon. Director, Bharatiya Vidya Bhavan
and
General Editor, Singhi Jain Series

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महाकवि-श्रीरामचन्द्र-गुम्फित-

रघुविलास नाटकोद्धारः ।

॥ अथ प्रथमोऽङ्कः ॥

सतीं यः केवलां दृष्टिं हृतामत्युग्रकर्मणा ।
तीर्त्वा मोहाब्धिमानैषीद् वीरायास्मै नमो नमः ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः – (सप्रमोदम्)

सीतां काननतो जहार विहितव्याजः पुरा रावणः
तं व्यापाद्य रणेषु तां पुनरथो रामः समानीतवान् ।
एतस्मै कविसूक्तिमौक्तिकमणिस्वाल्यम्भसे भूर्भुवः-
स्वर्व्यामोहनकारणाय सुकथारत्नाय नित्यं नमः ॥ २ ॥

पञ्चप्रबन्धमिषपञ्चमुखानकेन[1]
विद्वन्मनःसदसि नृत्यति यस्य कीर्त्तिः ।
विद्यात्रयीचणमचुम्बितकाव्यतन्द्रं[2]
कस्तं न वेद[4] सुकृती किल रामचन्द्रम् ? ॥ ३ ॥

रामात्[5] पूर्वं मधुरा व्यक्तं वाचो वपुष्मतां नाऽऽसन् ।
कथमन्यथा सुधार्थं ममन्थुरमृतान्धसः[6] सिन्धुम्[7] ॥ ४ ॥

सूत्रधारः – मारिष ! हृदयङ्गममभिदधासि । यतः –

उच्चरणलब्धकीर्त्तेराज्ञारहितस्य[9] लक्षणयुतस्य[10] ।
रामस्य वनं शरणं जितपरकलभस्य[11] शरभस्य[12] ॥ ५ ॥

---

१ मुखु १, प्रतिमुखु २, गर्भु ३, विसृष्ट ४, निर्वहणु ५ । भारती १, सात्त्विकी २, कौ (कै) शिकी ३, आरभटी ४ । २ विद्यात्रय्या वित्तः विद्या० वित्तः, "तेन वित्ते प्रसिद्धे चञ्चु-चणौ" (सिद्धहेम० ७-१-१७५) । ३ अनास्वादितकवित्वालस्यम् । ४ जानाति । ५ रामचन्द्रमहाकवेः । ६ देवाः । ७ सिन्धुं समुद्रम् । ८ उच्चं च तद् रणं च तत्र लब्धा कीर्त्तिर्येन । ९ दशरथेन रहितस्य, पक्षे आज्ञारहितस्य । १० लक्षणं लक्ष्म लाञ्छनम्, अत एव लक्षणयुतस्य । ११ जिता परेषां कला मनोज्ञा भा कान्त्यादिरूपा येन तस्य; पक्षे कलभः इभः । १२ शरैर्भवतीति शरभः तस्य; पक्षे शरभो जीवविशेषः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कः पुनरस्मिन् राज्याभिषेकमङ्गले ऋतुः समुचितो गातुम् ? । (विमृश्य) हुं ज्ञातम् – वसन्तः । तथा हि –

ऋतुषु वसन्तः करणेषु लोचनं कामिनी च विषयेषु ।
दयितेषु जीवितव्यं विद्या च कलासु खलु सारम् ॥ ६ ॥

[रामप्रवासकाले दशरथं प्राणसङ्कटे पतितं श्रुत्वाऽमात्यसुबुद्धेर्विषादवाक्यम्-]

न्याय ! स्थानमुपैहि किञ्चिदपरं, सौजन्य ! पुण्यक्षयो
जातस्ते, गुरुते ! हताऽसि, विनय ! प्राप्तोऽसि दीनां दशाम् ।
आधारो भवतामयं दशरथक्षोणीधरो दैवतः
कैकेयीकुलिशेन हन्त ! पतता निर्मूलमुन्मूल्यते ॥ ७ ॥

[कैकेयीवाक्यं दशरथं प्रति-]

[1]जइ सच्चं सच्चरई वरेण भरहस्स तो सिरिं देहि ।
सोलस वरिसाणि पुणो वणवासं रामभद्दस्स ॥ ८ ॥

[मूर्च्छाविरामानन्तरममात्यं प्रति दशरथवाक्यम्-]

न रामः [1]स्वैः स्तुत्यैर्नियतमभिरामः सुतगुणै-
रुताहो ! व्यक्तं मे विशदगुणगृह्यं[2] न हृदयम् ।
यदेतत् कैकेयीवचनमुपकर्ण्यापि यदहं
मरुन्मैत्रीहार्यैर्न[3] तनुतनुखण्डैर्विदलितः ॥ ९ ॥

[राजानं प्रति अमात्यवचः-]

इतः सत्योच्छेदो रघुकुलकलङ्कप्रथमभूः
सुतस्य श्लाघ्यस्य प्रवसनमितोऽकीर्तिपटहः ।
अकाण्डे तत् किञ्चित् प्रभवति विधेयं विधिवशात्
न चाऽऽदातुं हातुं न च यदिह शक्यं कथमपि ॥ १० ॥

राजा – देवि ! किमिदानीं दशरथस्य कृत्यम् ? ।

कौशल्या – [2]रामभद्रप्रवासणं ।

राजा – यद्ययमर्थो देव्याऽपि सम्मतस्तदानीम्–

निस्त्रिंशते ! भव पुरो, व्रज साधुवाद !,
दाक्षिण्य ! मुञ्च, विरम प्रियवादगर्व ! ।

1) यदि सत्यं सत्यरतिः वरेण भरतस्य तत् श्रियं देहि ।
षोडश वर्षाणि पुनः वनवासं रामभद्रस्य ॥ ८ ॥

2) रामभद्रप्रवासनम् ।

१ प्रसिद्धैः । २ गुणपाक्षिकम् । ३ वातसंसर्गोत्पाद्यैः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिह्वे! यतस्त्व निरवद्यचरित्रपात्रं
पुत्रं प्रवासयितुमेष विधेर्नियोगः ॥ ११ ॥

राजा—(आत्मानं प्रति सबाष्पम्)

ऋते सप्ताम्भोधेः प्लवनविधुरं कल्पदहनाद्
विना नानाप्रेङ्खत्प्रलयपवमानव्यतिकरम्।
क्षिपन् वत्सं रामं वनभुवि हतोऽयं दशरथो
रघूणां पन्थानं न चरति न च प्राकृतनृणाम् ॥ १२ ॥

स्त्रीवाग्भिर्व्यपसार्य राज्यसमयान्निर्दोषमूर्जस्वलं
पुत्रं ज्येष्ठमपास्तवान् दशरथः कान्तारवारांनिधौ।
विश्वेषां जगतां स्तुतेः पदमसौ तत्रापि रामो हहा!
केयं शाश्वतिकी प्रशस्तिरयशःप्रारोहभूर्मय्यभूत्? ॥ १३ ॥

राजा—(सखेदम्)

आः प्राणाः! पुरतोऽप्यमुं दशरथं यूयं ध्रुवं हास्यथ,
व्यातेने भुवनेऽत्र को नु पुरुषो ब्रूत स्थिरायुःस्थितिम्?।
तद् वत्सस्य गुणाम्बुधेर्वनमनु प्रस्थानवार्त्ताश्रुतेः
पूर्वं चेद् विजहीथ हन्त! भवति श्रेयस्तरं वः सदा ॥ १४ ॥

(नेपथ्ये)

सत्यं रघूद्वहपतेर्भरतस्य राज्यं
मातुश्च केकयभुवः परमप्रमोदम्।
मां काननाय दिशता जगतीहितेन
तातेन कर्म किमु नाद्य कृतं यशस्यम्? ॥ १५ ॥

श्रियं यः सन्त्यज्य श्रयति वनवासं पितृगिरा
स रामो वा लोकस्तवनवचसामस्तु विषयः।
सुमित्रापुत्रो वा गुरुजननिदेशादपि विना
निसर्गप्रीत्यैव व्रजति मुदितो राममनु यः ॥ १६ ॥

पुना **राजा**—(अमात्यं प्रति)

वैमात्रेयोऽप्यकृत तदयं लक्ष्मणो रामभद्रे
काकुत्स्थानां कुलमपतुलं येन जातं जगत्सु।

---

१ पश्चादपि। २ त्यक्ष्यथ। ३ प्राप्तवान्। ४ अपरमातृकः। ५ अपगता तुला सादृश्यं यस्य तत्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ख्यातस्तातोऽप्यथ दशरथः किञ्चिदेतद् व्यधत्त
व्यक्तं तस्मादजनि महतां सोऽपि पन्थाः कलङ्की ॥ १७ ॥

कौशल्या – [1]अज्जउत्त ! पविसदु वत्सो, पिच्छदु पियणो पादे ।

राजा – (साक्षेपम्)

यः पूर्वं शतशो ममांह्रियुगलीमाबाल्यतो दृष्टवान्,
भक्त्या तस्य बभूव देवि! विपिने तावन्निवासः फलम् ।
तां सम्प्रत्यपि वीक्षितुं गुरुतरोत्कण्ठाव्यथाव्याकुलो
वत्सः कां पुनरप्ययं स्पृहयति श्रेयस्तमां सम्पदम् ? ॥ १८ ॥

नाकीर्त्तिर्गणिता, श्रिता न सरणिर्लोकस्य, वृत्तं सतां
न ध्यातं, गुणशालिनो हृदि धृतं पुत्रस्य न प्रेम च ।
चण्डालाचरणाश्रिते विरचिते कर्मण्यधर्मा[2]विले
वक्त्रं दर्शयितुं न मे समुचितं द्रष्टुं न रामस्य च ॥ १९ ॥

[3]अलं श्रुत्वा वाचं सपदि मम वत्सेन कलुषा-
म[3]रण्यानीं [4]व्यालव्यसनशतकीर्णां प्रवसता ।
न नामादृश्यास्यः परमहमभाष्योऽपि महतां
तदास्तामास्तां मे वदनमपटीच्छादितमपि ॥ २० ॥

(नेपथ्ये)

[6]रजनीचरेण तमसा तप्तारामस्य देवरिपुजयिनः ।
ह्रियते विलापतुमला विधुवदनाऽऽशावधूरधुना ॥ २१ ॥

॥ इति प्रथमोऽङ्कः ॥

---

1) आर्यपुत्र ! प्रविशतु वत्सः, पश्यतु पितुः पादान् ।

---

१ पापमलिने । २ अलं श्रवणेन वाचः । ३ महदरण्यम् । ४ दुष्टश्वापदकष्टयुक्ताम् । ५ यवनिकाव्यवहितमपि । ६ रजनीचरेण तमसा रात्रिसत्कान्धकारेण । तप्तारामस्य-आराम इव आरामः तप्तारामः, तस्य तप्तारामस्य । ह्रियते आच्छाद्यते । विलापतुमला पक्षिकोलाहलाकुला । विधुरिव वदनं यस्याः सा । आशावधूः-दिग्वधूः, पूर्वा इत्यर्थः । कस्य ? देवरिपुजयिनः इन्द्रस्य । सूचितद्वितीयपक्षे – राक्षसेन तमोरूपेण । दुःखिता रामचन्द्रस्य । दानवजयिनः । नीयते । आक्रन्दाकुला । विधुरिव वदनं यस्याः । आशाया मनोरथेन उपलक्षिता वधूः शीता इत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अथ द्वितीयोऽङ्कः ॥

(नेपथ्ये)

सद्यो रक्षत हस्तशीकरकणान् दानाविलान् देज(दिग्ग?)जाः !
पादान् संहर भास्कराऽऽशु भवत च्छत्रं घनाः ! सर्वतः ।
मार्गं त्याजय निर्विलम्बमरुण[1] ! व्याकृष्य वल्गां हयान्[2]
देवो देवपतिस्मयव्ययपटुर्नन्वेति लङ्कापतिः ॥ १ ॥

वैनतेयः – (विलोक्य) कथं प्राप्त एव देवो दशकन्धरः ? ।

(ततः प्रविशति पुष्पकारूढो रावणः प्रहस्तप्रभृतिकश्च परिवारः ।)

[रावणः –]

कैलाशोद्धरणोद्भवस्य बलभिद्दर्प्पच्छिदाजन्मनः
चक्राप्तिप्रतिबोधितस्य च परानन्दामृतस्यन्दिनः ।
अन्यस्यापि महोत्सवस्य तममुं चूडामणिं मन्यते
पौलस्त्यो भविता[3] क्षणे जनकजा यत्रास्पदं चक्षुषाम् ॥ २ ॥

(प्रहस्तं प्रति) कं प्रदेशमलङ्करोति पुष्पकम् ? ।

प्रहस्तः – देव ! प्राप्ता एव दण्डकाम्[4] ।

रावणः – (सहर्षम्)

व्योमन्यत्र निषीद वाहनमहाराज[5] ! प्रसीद क्षणं
कल्पोत्तालसमीरवीरजयिनीं[6] जङ्घालतां[7] संवृणु ।
प्राप्नोत्वेष चिरादशेषकरणग्रामश्रमच्छेदिनं
सीतावक्त्रसरोजदर्शनसुधापानोत्सवं रावणः ॥ ३ ॥

[भयत्रस्तां शीतां प्रति रामवाक्यम्–]

अभूमिर्भीतीनां भुजविजितसीमान्तनृपतिः
प्रियेऽसौ सौमित्रिः कुवलयदलश्यामलतनुः ।
स्फुलिङ्गोग्रच्छायाच्छुरितमसियष्टिं प्रतिवहं-
स्तडित्तेजोभाजः कलयति[8] समृद्धिं जलमुचः ॥ ४ ॥

[रावणः –] (शीतां दृष्ट्वा सप्रमोदं प्रहस्तं प्रति –)

यस्याः पाणिमवाप्य काननचरः सोऽयं स्पृहायाः पदं
द्यावा-क्ष्माविजयोन्मदिष्णुमनसो लङ्केश्वरस्याप्यभूत् ।

---

१ अरुणः सूर्यसारथिः । २ तुरङ्गमान् । ३ भविष्यति । ४ दण्डकाभिधानारण्यम् । ५ पुष्पक ! । ६ युगान्तोत्सुकवातसुभटजयिनीम् । ७ वेगवत्ताम् । ८ दधाति सादृश्यं मेघस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धातुः शिल्पकलाकलापनिकषः स्वर्भूर्भुवश्चक्षुषां
निर्माणस्य फलं स्मरास्त्रमसमं सेयं विदेहात्मजा ॥ ५ ॥

(पुनः सहर्षम्) प्रहस्त! बाह्यनेपथ्यैरकदर्थितो विदेहराजदुहितुरङ्गसन्निवेशः।

वक्त्रं चन्द्रविलासि, पङ्कजपरीहासक्षमे लोचने,
वर्णः स्वर्णमपाकरिष्णुरलिनीं जिष्णुः कचानां चयः।
वक्षोजाविभकुम्भविभ्रमकरौ, गुर्वी नितम्बस्थली,
वाचां मार्दवमुज्ज्वलं युवतिषु स्वाभाविकं मण्डनम् ॥ ६ ॥

(पुनः साभिलाषम्) विफल एव ममावतारो जगति यदि विदेहजां विमानराजमारोप्य सलीलं नभसि न क्रीडामि। भवतु, वेषान्तरेण सन्निधाय निपुणमालोकयामि। (प्रहस्तं प्रति) वनितावेषो भव। (पुनः प्रभञ्जनस्य कर्णे एवमेव।)

(प्रभञ्जनो निष्क्रान्तः। सर्वे भूमाववतारं नाटयन्ति।)

रामः-(विलोक्य सविस्मयम्) कथमयं निर्मानुषप्रचारायां दण्डकायां नागरिकः? तत्रापि क्षत्रियकुमार इव। स्वागतं महापुरुषाय।

(रावणः सर्वेषां प्रणम्य सविनयमुपविशति। प्रहस्तः शीतायाः पादौ संस्पृश्य सलज्जमुपविशति।)

रामः-महाभाग! को भवान्? कथं वाऽस्यां निर्मानुषप्रचारायां दण्डकायाम्? किमर्थं चास्मान् पवित्रितवानसि?।

रावणः-पातालङ्कापतेश्चन्द्रोदरस्य विराधनामा सूनुरहम् चन्द्रोदरं व्यापाद्य दशकन्धरो भगिनीपतये खराय पातालङ्कां दत्तवान्। अहं च ततः प्रभृति भ्रष्टराज्यो रावणप्रतिभयेन अत्रत्यतापसपर्णशालासु निलीनस्तिष्ठामि। इयं च मे सधर्मचारिणी। शम्बूकप्रभवं राक्षसोपप्लवं च विज्ञाय युष्माकं समयोचितं साहायकमाधातुमुपागतोऽस्मि।

लक्ष्मणः-(सरोषम्) रघवः परेभ्यः साहायकमु(?म)पेक्षन्त इति को वचोव्यामोहः?।

[**रावणः**-] यदा न साहायकं तदा समयोचितं किमपि विज्ञप्तुमागतोऽस्मि।

लक्ष्मणः-विज्ञपितेनाप्यलम्। प्रथय तावद् रावणस्य कथाकन्थाम्।

रावणः-(विहस्य)

उदीचीं[1] रुन्धाने कलशभुवि[2] विन्ध्यः पुनरपि
प्रवर्द्धेताद्रीणामथ च न निषेद्धा तदपरः[3]।
तदेवं देवानां भयमभवदष्टापदगिरौ[4]
यदुत्क्षिप्ते लङ्कापतिरयमपन्थाः स्तुतिगिराम् ॥ ७ ॥

---

१ दक्षिणाया उत्तरां श्रयति सति। २ अगस्त्ये। ३ तस्मादगस्त्यादन्यो नास्ति। ४ कैलाशे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लक्ष्मणः-(सावज्ञम्)

कैलाशं स किल क्षिपाचरपतिर्मूर्ध्ना समुत्क्षिप्तवान्
एतेनार्जितमाजिना किमधुना वाहीनवृत्तेन नः ?।
काश्चित् खड्गकषोपलोपलिखितां तां ब्रूहि चर्यां यया
प्रत्यासीदति दुर्विदग्धमनसां चित्तं रघूणामपि ॥ ८ ॥

रावणः-(सरोषमात्मगतं कृतैकं विहस्य) कुमार! कतिशस्तुभ्यमभ्यर्णजनप्रमोदिनीं पुलस्त्यनन्दनस्य चर्याः संकीर्त्तयामि।

मुखानि दश हैहया-ऽमरपती च गुप्तिस्थितौ
पदं जलधिमूर्द्धनि स्फुटिकपर्वतः कुन्द(कन्दु?)कः।
अवाङ्मनसगोचरं चिरमुपादधद् विस्मयं
स्मयग्रहिलदोस्ततेर्जयति जन्म लङ्कापतेः ॥ ९ ॥

समजनि रणरङ्गे यस्य वक्षोऽभिघातै-
र्दलितरदनदण्डः स्वःकरेणुः करेऽणुः।
रजनिचरचमूनामीश्वरः श्रूयमाणः
स भवति न भयाय ब्रूहि केषां मृगाक्षि ! ॥ १० ॥

द्विपञ्चैस्तस्याऽऽस्यैर्द्विगुणदशभिर्लोचन-भुजै-
र्वपुर्वैरूप्यं तत् किमपि वहते राक्षसपतिः।
यदालोक्य स्मेरस्मरपरवशा सा हृदि शची
दिवो भर्तुर्भूम्ना परिभवपुरं श्लाघितवती ॥ ११ ॥

[रावणं प्रति रामवाक्यम्-]

शक्रेभद्विजदण्डखण्डनकरं वक्षस्थलस्य स्फुरत्
कार्कश्यं न खलु प्रपञ्चयति नः पौलस्त्यशौर्यश्रियम्।
अन्यः कोऽपि स वीरकुञ्जरमनःप्रत्यक्षरूपो न यः
शौण्डीर्यस्य न नाम शूरतुलनामर्हन्ति गण्डोपलाः ॥ १२ ॥

रामः-तदलमनया निशाचरकथया। कथय तावत्, किं समयोचितं निवेदयितुमागतोऽसि ?।

---

१ बलापहारिणा। २ खड्गकषपट्टलिखिताम्। ३ वार्त्ताम्। ४ रज्यते। ५ कृत्रिमम्। ६ मनःकल्पितशीतालक्षणसमीपलोकानन्दिनीम्। ७ रावणस्य। ८ सहस्रार्जुन-शक्रौ। ९ कैलाशः। १० भुजततेः। ११ दशभिर्मुखैः। १२ विंशत्या भुजैर्लोचनैश्च। १३ इन्द्राणी। १४ इन्द्रस्य। १५ प्राचुर्येण। १६ प्रकाशयति। १७ अस्माकम्। १८ वीरसादृश्यम्। १९ गण्डाः स्थूलपाषाणाः [illegible]।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रावणः—आगन्तवो[1] यूयम्, अहं पुनराकलितविपिनकुहरो वनेचरदेशीयः[2]। प्रभूतान्तरायं सम्परायं च रावणप्रमुखेभ्यो रक्षोभ्यः सम्भावयामि भवताम्। वधूवागुरानियन्त्रितमनसः कुत एव योद्धुमलंभूष्णवः? तदियमार्या वैदेही गहनवनकुहरमलङ्कुरुताम्। इयं च मे सधर्मचारिणी देव्याः संविधमधितिष्ठतु[3]।

रामः—(साक्षेपम्)

युद्धश्राद्धभटांसकुट्टिमतटीशाणानिशाताश्रयो[6]
देवीमप्यनलंभविष्णव इमे त्रातुं पृषत्का यदि।
मञ्चन्तः पृथुपुङ्खपातपवनैर्धम्मिल्लमाल्यश्रियं
द्रुह्येयुः[7] कथमिद्धकीकसघनां पौलस्त्यकण्ठाटवीम्[8] ॥ १३ ॥

रावणः—(सभयमपवार्य वैनतेयं प्रति)

सीतास्वयंग्रहमहैः सुभगंभविष्णु-
र्जिष्णुर्जगत्त्रयममुष्य वनेचरस्य।
प्रत्यर्थिपार्थिवयशःशशलक्ष्मराहुः
बाहुर्धनुर्ननु वहन् किमु नादधीत[9]? ॥ १४ ॥

वैनतेयः—(रामं प्रति)

यस्मात्[10] त्रस्तुर्[11] दिवमभिपतन् गोत्रहा[12] नेत्रवल्लीं
ग्रीवाभङ्गव्यसनविगमात्[13] तुष्टुवे पृष्ठभाजः[14]।
बिभ्राणस्य त्रिजगदतिभीमभ्यमित्रीणदीक्षां[15]
रक्षोभर्तुर्विमृश[16] समरे तस्य कः सांयुगीनः[17]? ॥ १५ ॥

विघटितहरिदर्पाम्भोधितीरः स वीरः
क्षणमपि हृदि कर्तुं साम्प्रत्तं साम्प्रतं[18] वः।
दशमुख इति चित्रं भर्तृवैरीति रोषं
स्मरवपुरिति कामं यः सुरीणां चकार ॥ १६ ॥

किमपरमुच्यते?

पविकिणगणहृप्यद्रक्षसो रक्षसो वः
प्रतिभयमभयानामप्यहं तर्कयामि।

---

१ देशान्तरादागताः। २ सदृशः। ३ समीपम्। ४ श्रद्धालु। ५ श्राण। ६ निशाता—तीक्ष्णीकृता अश्रिः—अग्रं येषां ते। ७ छिन्द्युः। ८ अस्थिनिबिडाम्। ९ किं न कुर्वीत?। १० यस्माद् रावणात्। ११ त्रसनशीलः। १२ इन्द्रः। १३ कन्धरावलनकष्टाभावात्। १४ पृष्ठस्थिताः, सर्वत्र नेत्रत्वात्। १५ त्रिजगतोऽतिक्रान्ता भीर्यस्यां सा। १६ अमित्रं अभि अभ्यमित्रीणः, शत्रुं प्रस्थित इत्यर्थः, तस्य दीक्षा व्रतम्। १७ परिभावय। १८ रणे साधुः। १९ युक्तम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जनिरजनि विजिष्णो रोदसी यस्य सार्धं
हरिहयहरिणाक्षीपत्रवल्लीव्ययेन ॥ १७ ॥

रामः-(वैनतेयं प्रति)

जम्भारिं दशकन्धरो दशमुखीवैरूप्यवीक्षागलद्-
दम्भोलिस्मरणं रणे यदजयत् किं नाम तत् कौतुकम्?।
आश्चर्यानपहार्यधैर्यमनसः सङ्ग्रामशिक्षाचण-
स्थामानः पुनरुन्मदिष्णुहृदयैरिक्ष्वाकवो दुर्जयाः ॥ १८ ॥

(नेपथ्ये)

नीरन्ध्रं परितश्चमूकरटिभिस्त्रिर्वेष्ट्यतां दण्डकां
शम्बुप्राणहरस्तरुं तरुमभि म्लेच्छः समालोक्यताम्।
जीवग्राहमयं वनेचरपशुर्ग्राह्यो भवद्भिः स्वयं
सेनान्यस्तदिदं समादिशति वः पाताललङ्कापतिः ॥ १९ ॥

रावणः-(वैनतेयं प्रति)

आकर्षन्ती वचनरचनावागुराभिः प्रसह्य[1]
प्राणान् धैर्यं भुजवन(बल)मदं स्थाम सत्त्वं[2] श्रियं च।
हृग्भ्यां शल्यं हृदि निदधती पाटलापाटलाभ्यां
वैदेही नः कथय किमियं कालरात्रिः[3]? प्रिया वा? ॥ २० ॥

[रामवाक्यं वनितावेषधारिणो भयभीतस्य प्रहस्तं(स्तस्य)प्रति-]

उत्पातपावकतरङ्गपिशङ्गधारा-[4]
निर्दग्धदुर्द्धरविरोधिशिरोधिबन्धः[5]।
हासं[6] ददद् दिविषदां[7] दशकन्धरस्य
कण्ठावीं (वलीं) खलु लविष्यति सूर्यहासः ॥ २१ ॥

रावणः-(समाकर्ण्य सरोषोपशमम्)

दोर्विक्रमेण दशकन्धरमाक्षिपन्तं
रे रे भुजः! सहत किं नरकीटमेनम्?।
ज्ञातं विदेहतनयापरिरम्भकेलि-
प्रत्याशया किमपि साम्प्रतमाकुलाः स्थः ॥ २२ ॥

---

१ हठात्। २ मनोऽवष्टम्भलक्षणम्। ३ यस्यां रात्रौ यमः प्रभवति सा कालरात्रिः। ४ पिङ्गल। ५ दुर्दान्तशत्रुग्रीवा। ६ प्रमोदम्। ७ देवानाम्, देववैरिवधात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[अवलोकिनी विद्या रावणं प्रति स्वस्फूर्त्तिं कथयति-]

सूर्याचन्द्रमसौ ग्रसे, विघटये रात्रिन्दिवस्यावधिं,
पत्युर्भोगभृतां हरे फणमणीन्, द्यावाभुवौ मीलये ।
मानस्थानविपर्ययेण विदधे स्त्रीपुंसयोर्लक्ष्मणी[1]
रक्षोराज! नियोजय क्वचिदिमां कृत्ये निजां किङ्करीम् ॥ २३ ॥

[रावणेन अवलोकिनीपार्श्वात् कारितकूटसिंहनादावसरे
भयत्रस्तायाः सीतायाः प्रति रामवाक्यम्-]

रणरसिकभुजेभ्यो विक्रमोत्ताननेत्राः
कति कति न रघुभ्यस्त्रासमासादयन्ति ? ।
यदि युगमधिजग्मुस्ते खराद्यास्ततः किं ?
स्वयमथ स दशास्यः प्राप कोपात् ततः किम् ? ॥ २४ ॥

(नेपथ्ये)

हंहो ! शम्बूककण्ठव्ययचतुरकरं क्रूरमेनं मनुष्यं
गृह्णीत च्छिन्त भिन्त क्षणुत दलयत स्वैरमह्नाय सैन्याः ! ।
भग्ने कोदण्डदण्डे शरधिशरभरे वह्निबाणेन दग्धे
रे रे दास ! क्व यासि ? स्मर किमपि खरः सोऽहमग्रे कृतान्तः ॥ २५ ॥

(— इति श्रुतेरनन्तरमेकाकिनीं सीतां लतागृहे मुक्त्वा चापमादाय रामो निष्क्रान्तः ।)

रावणः — (सप्रमोदम्) सम्प्रति रावणस्यावसरः । (विमृश्य) सती खल्वियम्, न शक्यते सावधानाऽपहर्त्तुम् । भवतु । (उच्चैःस्वरम्) —

आः क्षुद्रे म्लेच्छपत्नि ! स्मर गुरुविधुरा[2] दैवतं किञ्चिदिष्टं
लोलद्दम्भोलिकेलिव्रणितकरतलस्त्रातुमिन्द्रोऽपि नालम् ।
शम्बुप्राणप्रयाणभ्रकुटिबहुलितक्रोधमैत्रीकरालः
कालः कालुष्यभाजां हरति खलु खरस्तूलहारं शरस्ते ॥ २६ ॥

(सीता सभयमाकर्ण्य मूर्च्छति; रावणस्तामादाय पुष्पकमधिरोहति ।)

सीता — (चेतनामास्थाय साक्रन्दमुच्चैःस्वरम्) [1]हा अज्जउत्त ! हा वत्स लक्खण ! हा ताय जणय ! हा भाय भामंडल ! हा वणदेवयाओ अंबाओ ! रक्खेह मं असरणं रक्खसेण निज्जंतीं ।

---

1) हा आर्यपुत्र ! हा वत्स लक्ष्मण ! हा तात जनक ! हा भ्रातर्भामण्डल ! हा वनदेवता अम्बाः ! रक्षत मां अशरणां राक्षसेन नीयमानाम् ।

---

१ स्त्री-पुरुषलिङ्गे । २ महाकष्टपीडिता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रावणः—

आनन्दाश्रुसुसारिणि! त्रिभुवनप्रह्लादनाचन्द्रिके!
कोऽयं देवि! विमर्शवन्ध्यमहिमा वाग्विप्रुषां विक्रमः?।
रक्षोमात्रमवेत्य मां किमु मुधाऽऽक्रन्दाकुला खिद्यसे?
दासस्ते ननु वीरकुञ्जरभुजः सोऽहं पुरा रावणः॥ २७॥

[रावणं प्रति जटायुवाक्यमेतत्-]

रे रे रात्रिञ्चर! धर मनाक् पुष्पकं कं शरण्यं
हृत्वा सीतां रचयसि? पुरो नन्वयं ते जटायुः।
शातप्रान्तैः खर[1]कररुहैर्वज्रदण्डव्रणार्द्रां
गुच्छच्छेदं तव दशमुखीमेष सद्यश्छिनद्मि॥ २८॥

॥ इति द्वितीयोऽङ्कः॥

॥ अथ तृतीयोऽङ्कः॥

[सीताहृत्यनन्तरं रामस्य लक्ष्मणेन सह स्वस्थानोपरि मार्गे समागच्छतः वामाक्षिस्फुरणानन्तरमेतद् वाक्यम्-]

त्यक्तास्ताः कुलभूमयः, परिहृताः शोकाकुला ज्ञातयः,
प्रारब्धा वनचारिणां समुचिता वृत्तिस्त्रपाकारिणी।
एतस्मिन् विहितेऽपि दुष्करविधौ वेधा विधास्यत्ययं
यत् किञ्चित् पुरतः प्रपत्तुमखिलं रामस्तमप्युत्सुकः॥ १॥

(पुनरवलोक्य साशङ्कम्)

वृक्षे वृक्षे कै[2]रटपटलान्युच्चकैर्व्याहर[3]न्ते,
धावन्त्येते ककुभि ककुभि क्षुत्कराला: शृगालाः।
भूयो भूयः क्लमयतितमामश्रमिश्रः समीरः,
त्रस्तं त्रस्तं विपिनमधुना वत्स! कस्मादकस्मात्?॥ २॥

लक्ष्मणः—(साश्रम्)

यथा त्रस्तः क्रीडामृगशिशुरयं धावति जवाद्
यथा लीलाबर्ही वियदभिमुखं रौति चकितः।
यथा तूष्णीमास्ते तरलनयनः पञ्जरशुकः
तथा जाने सीताविरहितमिदं काननपदम्॥ ३॥

---

१ कठोरनखैः। २ काकवृन्दानि। ३ शब्दायन्ते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रामः-(साश्रम्) हा प्रिये वैदेहि! क्व मामेकाकिनं सन्त्यज्य गहने वने प्रयाताऽसि? (इति भणित्वा मूर्च्छति ।)

लक्ष्मणः-(सबाष्पम्)

प्रवासितस्य पुत्रस्य शोकशङ्कुवशां दशाम् ।
पश्य पश्याऽम्ब कैकेयि! मोदते येन ते मनः ॥ ४ ॥

रामः-(चेतनामास्थाय)

त्वमेव पत्तिर्मित्रं वा मन्त्री वा बान्धवोऽथवा ।
तदेहि देहि वैदेहि! मह्यं दुस्थाय दर्शनम् ॥ ५ ॥

(पुनः सवैकल्यम्)

अरण्ये मां त्यक्त्वा हरिण! हरिणाक्षी क्व नु गता?
पराभूतो दृष्ट्या कथयसि न चे मास्म कथय ।
अरे क्रीडाकीर! त्वमपि वहसे कामपि रुषं
यदेवं तूष्णीकामनुसरसि वाचंयम इव ॥ ६ ॥

लक्ष्मणः-(साश्रम्) आर्य! किमेतौ तपस्विनौ जानीतः? तत् कोऽयं व्यामोहः? ।

रामः-(समन्ततो विलोक्य)

कुरुबक! कुतस्तादृग् भूयस्तव स्तवताण्डवं?
कथयसि कथां कस्य प्रेम्णा पुरः शुकसारिके!?।
बकुल! मकुलापीडं[1] कस्ते करिष्यति [साम्प्रतं]?
स्थितमिव तव क्रीडाबर्हिन्! शिखण्डविमार्जनम् ॥ ७ ॥
रक्ताशोक![2]! तमाल! चम्पकलते! हिन्ताल! तालाऽऽश्रमे
युष्माकं वयमास्महे चिरमतः कस्मादुपेक्षा मयि?।
जाड्यं मुञ्चत दक्षिणाः[3] स्थ करुणां दीनेषु धत्त क्षणं
भिक्षां प्राणमयीं प्रयच्छत बत! ब्रूत क्व सा जानकी? ॥ ८ ॥
अनुपकृतयः[4] कामं तूष्णीं द्रुमा दधताममी
उपकृतवती[5] देवी किञ्चित् पुनस्तव केसर[6]!।
त्वमथ कथयोदन्तं तस्याः क्व सा? वसतीह किं
क्वचिदपि वनोद्देशे? केनाप्यथो हठतो हृता? ॥ ९ ॥

---

१ कलिकामुकुटम् । २ सर्वत्र वृक्षसम्बोधनम् । ३ कुशलाः । ४ अकृतोपकाराः । ५ गण्डूषप्रक्षेपेण । ६ बकुल! ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रामः – (लक्ष्मणं प्रति)

श्लथय सपदि दित्सां वत्स ! हस्तावलम्बे
समुपदिश मनाग् मे वर्त्म भूत्वा पुरोगः ।
जनकपतिसुतास्याम्भोरुहध्यानरोह-
ज्जलतरलिततारं नैतदोजस्वि चक्षुः ॥ १० ॥

[जटायुं प्रति रामवाक्यम्–]

आर्य ! ब्रूहि रघूद्वहेषु[1] किमियं वृत्तिः पराची[2] विधेः ?
प्रत्यङ्गं तिलशः[3] शठेन निहतः केनापि शातासिना[4] ।
दुष्प्रेक्षस्य निदानमस्य समभूत् पापीयसः पर्वणः
किं न क्वापि विलोक्यतेऽद्य विपिने सा ते वधूर्जानकी ? ॥ ११ ॥

पक्षी – (साक्षेपम्)

अस्त्रं शस्त्रमथो गृहाण किमपि व्यक्तं न ते सम्प्रति
त्राणं प्राणमुषा जटायुषि रुषा साटोपमास्कन्दति ।
मन्नाम्येष विरोधिवीरसमरश्रद्धापुराभोगिनः
चञ्चच्चञ्चुपुटाश्रमन्थचलनैस्ते स्कन्धबन्धाम्बुधिम् ॥ १२ ॥

[पुना रामो जटायुं प्रति–]

संरम्भं त्यज युद्धवीर ! विकटत्रोटेः किमाडम्बरो ?
दुर्दान्ताहितशिक्षयोः शिथिलय क्षेपं क्षणं पक्षयोः ।
नाऽऽस्ते सङ्गररङ्गनर्त्तनधुराधुर्यः पुरः कोऽपि ते
पश्योन्मील्य विलोचने ननु निजौ स्निग्धाविमौ राघवौ ॥१३॥

पक्षी – (प्रहारवेदनामभिनीय मन्दस्वरम्)

वत्से[5] ! मा स्म रुदः प्रवीरविजयश्रद्धालुदोर्विक्रमो-
त्तालव्यालकुलाहितुण्डिकनखः[6] प्राप्तो जटायुः स्वयम् ।
रे क्रव्यादनिषाद ! नन्दसि कियत् त्रोटीकुठारत्रुटन्-
कण्ठाभोगविसंस्थुलःस्फुरदसिन्यासैः किमेभिस्तव ? ॥ १४ ॥

लक्ष्मणः – (सबाष्पम्) आर्य !

निस्पन्दतां वपुरुपैति यथा समन्तात्,
पक्षौ यथांसशिखरप्रणयानपेक्षौ ।
आलिङ्गति क्षितिमियं च यथा शिरोधि-
र्जाने तथाऽजनि गतायुरयं जटायुः ॥ १५ ॥

---

१ रघुपुत्रेषु । २ विपरीता । ३ तिलमात्रखण्डानि कृत्वा । ४ तीक्ष्णखड्गेन । ५ शीते ! । ६ सर्पकुलगारुडिकनखः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रामः–हा प्रिये वैदेहि ! सी हहा निर्निमित्तबन्धो परोपकारैकरसिक जटायो ! क्वासि ? देहि मे प्रतिवचनम् । (–इति मूर्छति ।)

[रावणस्य कृत्रिमकृतविराधवेषस्य वनितावेषधारिणं प्रहस्तं याचतो रामवाक्यम् –]

न्यासप्रवासमधुना निरवद्यधाम्नि,
व्यालोक्य भास्करकुले प्रथमं कलङ्कम् ।
व्रीडावतो मम भवद्वनितापहाराद्
भूम्ना मतो जनकराजसुतापहारः ॥ १६ ॥

विराधः–परमार्थतः सीतापहार एवायम्, न पत्रलेखापहारः । परव्यसन-सङ्क्रान्तिदर्पणतलानि हि रघूणां चेतांसि ।

रामः–(सखेदम्)

स्त्रीत्राणमात्रमपि यो न विभुर्विधातुं[1]
सोऽहं निहन्तुमहितान् किमलंभविष्णुः ? ।
क्लीबं[2] विचिन्त्य वसुधातलपालनायां
माताऽपि केकयसुता खलु मामपास्यत् ॥ १७ ॥

[रामं प्रति विद्याधरवाक्यम् –]

कैलाशकम्पचणरावणदर्पसर्प-
संस्तम्भनप्रबलजाङ्गुलिकैकदोष्णः ।
श्रीवालिनः कपिपतेरनुजो जगत्सु
विख्यातविक्रमगुणाभिजनः[3] समस्ति ॥ १८ ॥

रामः–ततः किम् ? ।

विद्याधरः–तस्य सुग्रीवनाम्नो निदेशेन हनुमतः समीपं गत्वा प्रतिनिवृत्तेन मया चित्राङ्गदेन दृष्टः ।

रामः–जानकीमपहरन् कोऽपि दृष्टः ? ।

विद्याधरः–'हा रामभद्र ! हा लक्ष्मण !' इति प्रलपन्तीं जानकीं रावणो अपहरन् दृष्टः ।

रामः–

राज्यश्रीर्गणिता तृणाय, विदितः क्लेशो न कान्तारभूः,
न ध्यातौ पितरौ, स्मृता न सु हृदो, नोत्कण्ठितं ज्ञातिषु ।
यत्प्रेमाब्धिविलग्नमग्नमनसा तद् ब्रह्म लीढं मया,
रक्षस्तां रुदतीं जहार, कठिनः सोऽहं पुनः प्राणिमि[4] ॥ १९ ॥

---

१ समर्थः । २ कातरम् । ३ गृहम् । ४ जीवामि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विद्याधरः-जटायुरपि सीताया अनुपदिकश्चन्द्रहासन्यासै रावणेन व्यापादितः।

रामः-

साक्षाद् यज्ञभुजां[1] निहत्य समरे तं रावणं, प्राणतीं[2]
यां द्रक्ष्यामि विदेहराजतनयां, सेयं न मां बाधते।
प्राणान् यस्तु परोपकारकरणप्रत्याशया केवलं
मत्कार्ये विजहौ हहा! कथमयं दृश्यो जटायुर्मया? ॥ २० ॥

रामः-(लक्ष्मणं प्रति)

क्लीबः स्यां शुचमादधे यदि मुहुर्धृत्वाऽथ धैर्यं भजे
क्रीडां डम्बरिणीं तदा न चरितं प्रेमानुरूपं भवेत्।
दुःखावासममुं विदेहदुहितुः कृत्वा प्रवासं हहा!
दैवेनोपनतः शठेन विषमः कोऽप्येष पन्था मम ॥ २१ ॥

विद्याधरः-महाभाग!

सरोषे सौमित्रौ क्षिपति विशिखालीं खरशर-
च्छिदालंकर्मीणां[3] समरभुवि के नाम रिपवः?।
तदद्यप्रातीनां[4] कलय दशकण्ठव्ययकरीं
क्रियामद्यश्वीनं[5] गणय दयिताया व्ययकरम् ॥ २२ ॥

रामः-(सावष्टम्भम्) चित्राङ्गद!

निहत्य दशकन्धरं सह विपक्षरक्षःकथा-
प्रथाभिरधिसङ्गरं जनकजां ग्रहीष्ये ध्रुवम्।
शशाक न स रक्षितुं रघुपतिः परेभ्यः प्रिया-
मयं तदसम्भवी चिरमकीर्त्तिकोलाहलः ॥ २३ ॥

रामः-(सखेदम्) वत्स लक्ष्मण!

कलत्रमपि रक्षितुं निजमशक्तमात्मान्वय-
प्रसूतमभिवीक्ष्य मामहह! जातलज्जाज्वरः।
प्रकाशयितुमक्षमः क्षणमपि स्वसाम्यं जने
प्रयाति चरमोदधौ पतितुमेष देवो रविः ॥ २४ ॥

तदेहि लतागृहमनुतिष्ठामः।

(इति निष्क्रान्ताः सर्वे।)

॥ तृतीयोऽङ्कः ॥

---

१ देवानाम्। २ जीवन्तीम्। ३ अलंकर्मीणां मस्तकच्छेदसमर्थाम्। ४ अद्य प्रातर्वा भवा अद्यप्रातीना। ५ अद्य श्वो वा भवमद्यश्वीनम्, कालादक् इनश्च अव्ययानामन्त्यस्वरादिलोपश्च।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अथ चतुर्थोऽङ्कः ॥

(ततः प्रविशति कञ्चुकी ।)

कलकण्ठः – (रावणमुद्दिश्य)

कुस्वामी च हुताशश्च द्वावप्येतौ सहोदरौ ।
एकः सेवकसन्तापी स्वभावः कथमन्यथा ? ॥ १ ॥

शुकनाशः – (कलकण्ठं प्रति) सीता तृणायाऽपि रावणं नाभिमन्यते ।

कलकण्ठः – कमिव (किमेद) मभिदधासि ?

स्वतो न कश्चन गुरुर्लघुर्वाऽपि न कश्चन ।
उचिताऽनुचिताचारवश्ये गौरव-लाघवे ॥ २ ॥

शुकनाशः – किं पुनः सर्वकर्माणबुद्धिर्देवो न स्वयमेवाऽवबुध्य दुराचारमपजहाति ?

कलकण्ठः – किमिदं पुनरचतुरजनोचितं विपश्चयसि ? ।

अधार्मिकमलावण्यमगुणं मर्मभाषिणम् ।
यः स्वयं स्वं विजानाति तेन वन्ध्या वसुन्धरा ॥ ३ ॥

(नेपथ्ये)

ऐश्वर्यं वैदग्धी सौन्दर्यं तरुणिमा प्रियवियोगः ।
तदिदममूर्त्तो वह्निर्विक्लवयति कं न धीरमपि ? ॥ ४ ॥

कलकण्ठः – किमेष लङ्कापतिर्वैदेहीविरहानलाभितापमनुभवति ? ।

(ततः प्रविशति रावणः कुन्तलकश्च ।)

रावणः – कुन्तलक !

दम्भोलिदण्डोऽपि पुरा व्यधत्त
बाधां न यस्याऽऽहवसौण्डदोष्णः[1] ।
तां तस्य सीतां स्मरतः प्रकामं
कामेन का मे न कृता व्यथाऽन्तः ? ॥ ५ ॥

कुन्तलः – (रावणं प्रति)

नवावतारह्रद्योऽपि मधुस्तस्या मृगीदृशः ।
त्वां विना भूर्भुवःस्वःश्रीकान्त ! कां तनुतां[2] मुदम् ? ॥ ६ ॥

रावणः – कथयति जानकीवियोगवार्त्तां प्रतिवासरं त्रिजटा – वयं पुनर्न कामपि कामार्तिमुपलक्षयामः ।

कुन्तलकः – किमेवमादिशति देवः ?

प्रायेण पुंसि परिरम्भण-चुम्बनानि
सन्तन्वते[·····]वामदृशां स्मरार्त्तिम् ।

---

१ समरसमर्थभुजस्य । २ करोतु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतास्ततः कतिपयाः(ये?)प्रियविप्रयोगे
कालं क्षिपन्ति कुसुमेषुविकारबन्ध्याः ॥ ७ ॥

[रावण[स्य] प्रभातसमये उद्गच्छतो(न्तं?)रविं प्रति वाक्यम्-]

व्यर्थं स्मापयसे बहूनि कमलान्यादित्य!, तन्मैथिली-
वक्त्राम्भोरुहमेकमेव यततां स्मेरं विधातुं भवान्।
स्मेरेऽस्मिन् परितापकारिणमतिक्षुद्रं क्षिपायाः पतिं
क्षिप्त्वा त्वां क्षणदास्वपि प्रथयति स्फूर्जत्प्रभं रावणः ॥ ८ ॥

किञ्च-

दिनकर! कृपयैव प्रेरितश्चेत् तदास्य
[3]योजयतिषज विधुरस्य प्रेयसीं चक्रनाम्नः।
अथ फलमपि किञ्चित् काङ्क्षसि क्लेशलभ्यं
घटय ननु तदानीं जानकीं रावणस्य ॥ ९ ॥

(रावणः सीतासमीपमागत्य वल्ल्यन्तरितः सीता-त्रिजटयोः परस्परवार्तां शृण्वन्नस्ति।)

सीता-[1]तिअडे! यदो पहुदि अहं आणीदा तदो पहुदि अत्थि मे एदम्मि अत्थे अहिलासो।

रावणः-(श्रुत्वा सप्रमोदम्) एतस्मिन् रावणानुसरणेऽस्त्यभिलाषः। केयमनभ्राश्रवणोत्पलानां सुधावृष्टिः?। कोऽयं दुस्तपतपःप्रसूतस्य प्राचीनपुण्यविपाकस्य प्रकर्षः?। (पुनरात्मानमालोक्य)

वक्त्राणि हे! हसत गायत तारतारं,
नेत्राणि! चुम्बत विहस्य च कर्णपालीम्।
दोर्वल्लयः! कुरुत ताण्डवडम्बरं च
श्रीरावणं ननु विदेहसुता रिरंसुः ॥ १० ॥

रावणः-(रामवधवाञ्छावसरे आत्मानं प्रति)

त्रपां क्षणमुपेक्ष्य हे नयत राघवं लाघवं
पुरन्दरपराक्रमग्लपनचञ्चवो बाहवः!।
यदि स्फुरति जानकीजघनपीठ-कण्ठस्थली-
कपोलफलक-स्तनस्तबककेलिकौतूहलम् ॥ ११ ॥

सीता-(त्रिजटां प्रति) यदि रामः कदाचिदपि विनाशं यास्यति तदाऽहं हुताशनं साधयिष्ये।

1) त्रिजटे! यतः प्रभृति अहं आनीता ततः प्रभृति अस्ति मे एतस्मिन् अर्थे अभिलाषः।

१ कन्दर्पः। २ विरहिणां परितापकारी। ३ संयोजय।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[इति भणितानन्तरं रावणश्चिन्तयति—]

केयं कालकूटवृष्टिः?

ददाति रागिणी प्राणान्, आदत्ते द्वेषिणी पुनः।
रागो वा यदि वा द्वेषः कोऽपि लोकोत्तरः स्त्रियाः॥ १२॥

अन्यत्—

शरनिकरं वर्षत्यपि भगवति मदने घनेऽपि च प्रेम्णि।
प्रायेण स्त्री कथमपि धैर्यं न जहाति पुरुष इव॥ १३॥

सीता—[1]अवि य जीवंतीं जइ मं अज्जउत्तो पिच्छे ता सिढिलपिम्मो भवे।

यतः—

[2]जम्मि विउत्ताइं पुणो जीवंताइं मिलंति मिहुणाइं।
पिम्मम्मि तम्मि छेया किं कह वि कयायरा हुंति?॥ १४॥

रावणः—अयि स्मरनगरनागरिके! विष्टपदृष्टिचकोरीचन्द्रिके! शृङ्गाररसभृङ्गार-कल्पामनल्पार्थामेतामेव गाथां भूयोऽप्यभिधाय सुधासारेणाभिषिञ्च श्रवणोत्पलकाननं दशास्यस्य।

(सीता सरोषमधोमुखी तिष्ठति।)

रावणः—(सप्रमोदम्) कलकण्ठ!

देव्या वक्त्रमलाञ्छनस्तुलयति श्वेतद्युतिः पार्वणो,
वाचां पाकमपाकरोत्यलवणोदन्वत्प्रबुद्धा सुधा।
अम्भोजानि दृशोरनश्वरविकाशानि श्रियं बिभ्रते,
कम्बुः कण्ठकलां प्रभुः कलयितुं कौटिल्यवन्ध्योदरः॥ १५॥

(सीतां प्रति)

हरौ चरति चारकाश्रमतपस्वितां तां शचीं,
भुजिष्यदयितेति यः परिरिरंसुमप्यस्तवान्।
स्वयं स दशकन्धरो विनयवामनैराननैः
स्तुवन् सुदति! याचते वचनहन्तकारं त्वयि॥ १६॥

सीता—(सरोषं रावणं प्रति) [1]पडिहदो सि भयवईणं रघुकुलदेवयाणं पभावेण

रावणः—मुग्धाऽसि दुग्धमुग्धविलोचने!

1) अपि च जीवन्तीं यदि मां आर्यपुत्रः प्रेक्षेत तदा शिथिलप्रेमा भवेत्।
2) यस्मिन् वियुक्तानि पुनः जीवन्ति मीलन्ति मिथुनानि।
प्रेम्णि तस्मिन् छेकाः किं कथमपि कृतादराः भवन्ति?॥ १४॥
3) प्रतिहतोऽसि भगवतीनां रघुकुलदेवतानां प्रभावेण।

१ अक्षारसमुद्रोत्पन्ना। २ कर्मकरप्रियेति। ३ भिक्षाम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रणभुवमधिरूढे यत्र खेलद्बलानां[1]
शरणमरिकुलानां संयमो वा यमो वा।
हरिजयमदमैत्रीक्षीवदोर्दण्डखण्डे
विजयिनि मयि तस्मिन् का कथा देवतानाम्? ॥ १७ ॥

रावणः—(कुन्तलकं प्रति)

देव्याः पयोधरभरश्चिरसंस्तुतस्य
मध्यस्य सेवितुमुपाहितनीविवृत्तेः[2]।
दारिद्रमेष वितरन् परमुद्धतत्व-
कार्कश्ययोः समुचितं किमु न व्यधत्त? ॥ १८ ॥

रावणः—(सीतां प्रति)

यायावरेण किमनेन वनेचरेण
मां स्थावरं वरमुपास्व कुरङ्गनेत्रे!।
किं वा स्तुवे तव पुरश्चतुरस्थितीनां[3]
वैदग्ध्यसौरभवती भवती प्रकाण्डम् ॥ १९ ॥

सीता—[1]को वि जावरो? को वि थावरु? त्ति लक्खणनारायपद्धई करिस्सदि।

रावणः—(सरोषं चन्द्रहासं परामृश्य)

प्रेमावनद्धहृदयः सर्वं लङ्केश्वरः सुदति! सोढा।
सोढा न चन्द्रहासः पुनरयमुल्लुण्ठवृत्तीनाम् ॥ २० ॥

सीता—(सरोमाञ्चम्) [2]भयवं तिहुअणसिरिनिवास चंदहास! रक्खसकरफरिसमलिदाए सीदाए देहि पच्छित्तं। अवणेहि उत्तमंगं। करेहि दुक्खमुक्खं।

रावणः—(कुन्तलकं प्रति)

सा वीरेषु प्रथमगणना दोर्भृतां सा प्रकाण्डं
स्थाम्नां विश्वत्रयविजयिनां जानकी सैव भूमिः।
दास्यं यस्यां स्पृहयति जगद्युद्धकण्डूभिषग्भि-[4]
र्दोर्भिर्बद्धाञ्जलिरहरहः सोऽपि लङ्काधिनाथः ॥ २१ ॥

---

1) कोऽपि यायावरः? कोऽपि स्थावरः? इति लक्ष्मणनाराचपद्धतिः करिष्यति।

2) भगवन् त्रिभुवनश्रीनिवास चन्द्रहास! राक्षसकरस्पर्शमृदितायै सीतायै देहि प्रायश्चित्तम्। अपनय उत्तमाङ्गम्। कुरु दुःखमोक्षम्।

---

१ क्रीडत्। २ उपाहिता—आश्रिता नीविवृत्तिर्येन। ३ चातुर्योपेतानां स्त्रीणां मध्ये वैचक्षण्यवती त्वमेव प्रधानम्। ४ समरखर्जूवैद्यैः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(सीतां प्रति)

स्मेराक्षि ! मां श्रितवती रणरङ्गमल्ल-
मालोकयिष्यसि दृशा शबरं कदाचित्।
दोर्दण्डमण्डलतृणीकृतशक्रयुद्धे
क्रुद्धे पुनर्मयि न ते शबरो न चाहम् ॥ २२ ॥

रावणः—(सविनयम्)

एणाक्षि ! स्मरजीवनौषधिलसल्लावण्यपुण्याकृते !
सौभाग्यावनि ! मञ्जुभाषिणि ! दलद्बन्धूकमुग्धाधरे !।
अस्मिन् भृत्यलवे निवेशय दृशं हृद्यां प्रसीद प्रिये !
लङ्काराज्यमुपास्य भूषय ननु स्वर्भूर्भुवोर्वैभवम् ॥ २३ ॥

रावणः—(सखेदम्)

लङ्केश्वरे त्रिदशदर्पहरे विरागो
रागस्तु काननचरे जनकात्मजायाः।
सौन्दर्य-विक्रम-कला-विभवानपेक्षः
प्रेम्णां विचारविमुखः खलु कोऽपि पन्थाः ॥ २४ ॥

(पुनः कलकण्ठं प्रति)

आस्तां कण्ठलयः, कृतं जघनभू-नाभि-स्तनोपासनैः,
सीतायाश्चरणारविन्दरजसां मैत्र्याऽपि ये नाञ्चिताः।
तेषां पामरचित्तचित्रजनकैर्द्यावापृथिव्योर्जयैः
कोऽयं नाम वृथा निशाचरपतेर्दोष्णां मदोपप्लवः ? ॥ २५ ॥

रावणः—(सीतां प्रति)

एषोऽस्मि प्रणतः कृपां कुरु पुरस्ते देवि ! बद्धोऽञ्जलि-
र्दम्भोलिव्रणपत्रलां दशमुखस्यालिङ्ग्य वक्षस्थलीम्।
त्रैलोक्यप्रथितानि तानि चरितान्यष्टापदान्दोलन-
स्वर्गाधीश-सहस्रबाहुविजयप्रायाणि सत्यापय ॥ २६ ॥

॥ इति चतुर्थोऽङ्कः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अथ पञ्चमोऽङ्कः ॥

(नेपथ्ये)

हञ्जीरस्खलदंहिरानतमुखः शक्रोऽपि सान्तःपुरः
पौराणां पुरतः पुरा श्लथकचो बभ्राम यत्रासकृत् ।
आः ! कालस्य हतस्य तस्य वशतः सैषाऽपि लङ्कापुरी
प्रत्यर्थिप्रतिरोधबद्धनिखिलद्वाराऽधुना वर्त्तते ॥ १ ॥

विभीषणः – कथमयमार्यो विषीदति मारीचः ? ।

(प्रविश्य)

मारीचः –

लोकः संवृतहेममण्डनविधिर्नाट्यस्य शिक्षाभुवो
निस्तालश्रुतयः, स्थितः स मधुरः सर्वत्र गीतध्वनिः ।
प्राकारो भटसङ्कुलः, प्रतिगृहं प्रत्यर्थियात्राकथा,
देवे सत्यपि रावणे कथमिमां पुष्णाति लङ्का दशाम् ? ॥ २ ॥

रावणः –

आधाय सर्वसुभगां सुमेधसा वेधसा जनकतनयाम् ।
सामग्री[1] न गुणानामियं मृषोद्या श्रुतिर्विहिता ॥ ३ ॥

कलकण्ठः – देव !

रसः क्वापि क्वचिद् गन्धो रूपं क्वचन सुन्दरम् ।
रसो गन्धश्च रूपं च नारङ्गे त्रितयं स्थितम् ॥ ४ ॥
चलकमलविलासाभ्यासिनी नेत्रपत्रे
दशनवसनभूमिर्बन्धुजीवं[3] दुनोति ।
स्मरभरपरिरोहत्पाण्डिमारूढगूढ[4]-
द्युतिविजितमृगाङ्का मोदते गण्डभित्तिः ॥ ५ ॥

अपि च –

वैदेहीपदयुगलीं दृष्टवती भगवती न खलु लक्ष्मीः ।
कथमपरथा निवासप्रीतिं पङ्केरुहे कुर्यात् ? ॥ ६ ॥
उपेक्ष्य लवणक्षयं, चिरमपास्य तीव्रं तपो,
निरुध्य चपलं मनः, प्रतिनिषिध्य कर्मान्तरम् ।

---

१ एकत्र पात्रे समग्रा गुणा न भवन्तीति श्रुतिर्मिथ्या कृता धात्रा । २ अधरपल्लवभूः । ३ बन्धूकम् । ४ सुप्रतिष्ठ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विरञ्चिरुपदीविधौ[1] चतुरबुद्धिरुद्धौजसं,
दशास्यमुपसेवितुं घटितवान् विदेहात्मजाम्? ॥ ७ ॥

बिभीषणः-(सविनयम्) देव! किमपि विज्ञपयितुकामोऽस्मि।

रावणः-विज्ञपय।

[बिभीषणः-]

एकस्यैव वनेचरस्य कपयः सर्वेऽपि यत् पत्तयो-
ऽभूवन् वीरमतल्लिका[:] प्रतिमुहुस्तन्मेऽन्तरुल्लिख्यते।
विश्वेषूत्सवहेतवो न विधयः, कालो हि वैचित्र्यभाग्,
भ्रातः! शान्तिमुपैहि, नन्दतु चिरं सोऽयं कनिष्ठो जनः ॥ ८ ॥

रावणः-(साश्चर्यम्)

यद्वक्षस्तटपृष्ठघृष्टरदनं कान्तं निरीक्ष्य क्षणं
चक्षुः कोपकडारमन्यकरिणीभ्रान्त्या बभूवाऽभ्रमोः[3]।
कैलासोद्धरणव्रणस्थपुटितस्कन्धस्य तस्याऽऽहवे
लङ्केन्द्रस्य भयं वयं वनचरात् सम्भाव्य रोमाञ्चिताः ॥ ९ ॥

अपि च-

तामेतां[4] दधते स जिह्मगपतिः[5] कश्चिद् द्विजिह्वः[6] क्षमां
यादः[7] कोऽपि स कच्छपोऽथ पशवस्ते केऽपि दिग्दन्तिनः।
वीराद्वैतकथां तथापि वहते नाथः क्षिपाचारिणा-
मित्थं यः सततं विषीदति स किं साध्यो द्विषां रावणः? ॥ १० ॥

मारीचः-(प्रणम्य)

देव! प्रसीद भव सर्वजनीनबुद्धि-
र्नानात्मनीनमनुतिष्ठति तुन्दिलश्रीः[8]।
वैरङ्गिकं[9] त्रिजगतो विजहीहि कर्म
शर्माणि संश्रयतु शाश्वतिकानि लङ्का ॥ ११ ॥

रावणः-(साहङ्कारम्) आर्य!

मा भैषीरधिसङ्करं वनचरं व्यापादयिष्ये, स वा
हन्यान्मां, धिगमङ्गलं, न धिगथो व्यापत्तिरप्युत्सवः।
मूर्द्धानः समिधः कृताः सुरजिता[10] शस्त्रानलस्याऽऽहवे
मत्प्रेम्णा तदिदं विदेहतनया पश्चादपि ध्यास्यति ॥ १२ ॥

---

१ प्राभृतविधौ। २ रक्तम्। ३ ऐरावणप्रियायाः। ४ भुवम्। ५ सर्पपतिः। ६ शेषः। ७ "अन्तर्जलचरं सत्त्वं क्रूरं यादोऽभिधीयते"। ८ स्फारलक्ष्मीकः। ९ विरागार्हम्। १० रावणेन।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रावणः-किञ्च-

वेश्मन्यायोजितो येन हरिर्मातङ्गकर्मसु।
पौलस्त्यस्याऽऽहवे मल्लः कस्तस्याऽपूर्ववेधसः? ॥ १३ ॥
सौख[1]प्रसुप्तिकविधौ धिष[2]णो नदीष्णः[3]
सौस्नातिकः[4] सकलदैत्यमहत्तरश्च।
लालाटिकास्तदपरे ग्रहराशि-तारा[6]
यस्याप्रियङ्करममुष्य[7] किमस्तु मूर्ध्नाम्? ॥ १४ ॥

अपि च विचित्राभिप्रायो जनः।

कैलासोद्धरणं तथा न, न तथा दर्पापहारो हरेः,
नाप्युत्कन्धरहैहयेश्वरभुजादम्भोलिभङ्गस्तथा।
सीताप्रेमविसंस्थुलो दशमुखः स्वैर्मूर्द्धभिर्मेदिनी-
खण्डं मण्डितवान् तदेतदधिकं कीर्त्यै यथा भाति नः ॥ १५ ॥

रावणः-(कलकण्ठं प्रति) इत्थं किमिदमरावणोचितं विपश्चयसि? ममापि नाम दशकन्धरस्य रिपवः?।

अम्भोदाः! सप्त[9]कृत्वः स्थगयत निखिलं मण्डलं चण्डभानो-
र्देवः श्रीराक्षसेन्द्रो न खलु विषहते पादसंस्पर्शमेषः।
इत्थं यस्य प्रयाणे तुमुलयति दिशः स्वर्गिणां चाटुकार-
स्तं योद्धुं यातुधानाधिपमधिमनसं कोऽभिकाङ्क्षेत् सकर्णः? ॥ १६ ॥

(पुनः सखेदम्) यदि वा सौविदल्ल!

लूनं वनेचरशिशोर्न शिरो न गाढ-
मासादितो जनकजापरिरम्भकेलिः।
दम्भोलिकोणकिणचन्द्रकसिध्मलानां[11],
दोष्णां पुरन्दरजयेन क एष दर्पः? ॥ १७ ॥

(पुनः सविषादम्)

कियदिदमिति बुद्ध्या दर्पकण्डूलबाहुः
सुरविजयकथाभिर्व्रीडमालम्बते यः।
मनुजभुजकलाभिर्भाप्यते सोऽपि लङ्का-
पतिरहह! विपाकः कर्मणां कोऽप्यचिन्त्यः ॥ १८ ॥

---

१ सुखरात्रिपृच्छकः। २ बृहस्पतिः। ३ कुशलः। ४ सुस्नातपृच्छकः। ५ शुक्रः। ६ भालपट्टे रेषां पृच्छन्ति। ७ रावणस्य। ८ सहस्रार्जुनः। ९ सप्तवारान्, वारस्य संख्यायाः कृत्वस्। १० राक्षसः। ११ कुष्ठिनाम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(पुनः सवितर्कम्)

श्लाघ्यः सैव, यदर्थमेवमनिशं सीता परिक्लाम्यति,
क्रूरस्य प्रणयादमुष्य खलु सा नास्मभ्यमुत्ताम्यति।
व्यारोहत्परितोष-रोषविकसद्रोमाञ्चसान्द्रीभवद्-
दोष्णां पश्य वनेचरः कथमभूद् वन्द्यश्च निन्द्यश्च नः? ॥ १९ ॥

बिभीषणः–(रावणं प्रति)

डिम्भत्वं वनचारिणोः खरकुलात् प्रत्येति[1] कोऽन्यस्तयो-
र्वाली[2] यं विनयं व्यधत्त समरे तत्राब्धयः साक्षिणः।
पार्ष्ण्या मौलिकिरीटकुट्टनमहं देवः स्वयं दृष्टवान्,
भ्रातः! शान्तिमुपैहि सान्त्वय नय-स्थामोद्धुरौ तौ नरौ ॥ २० ॥

रावणः–(सखेदमिव)

व्याधूतस्फटिकाद्रिसन्धिनिलयानासूत्रयद्भिः पृथून्,
प्रीतिर्या वचसामधाम विदधे स्वःस्वैरिणीनां हृदि।
वैदेहीपरिरम्भणव्यसनिनो लङ्कापतेः साम्प्रतं,
दोस्तम्भाः शबरेऽपि पश्य दधते ते स्थामदुःस्थां स्थितिम् ॥ २१ ॥
कल्पान्तताण्डवितताप्तकलापचण्ड-
मार्त्तण्डमण्डलविडम्बि विलम्बि चक्रम्।
दोष्णयत्र यावदमरीकबरीकृतान्ते
तावत् स पक्वणचरः शबरस्तपस्वी[3] ॥ २२ ॥

(नेपथ्ये)

धृत्वा करे दशमुखं सविमानराजं
क्रीडाशकुन्तमिव पञ्जरभाजमाजौ।
बभ्राम यो जलधिकूलवनस्थलीषु
तस्याहमेष तनयो ननु चन्द्रराशिः ॥ २३ ॥

(प्रविश्य चन्द्रराशिः रावणं प्रणमति।)

रावणः–(साक्षेपम्) अरे बलीमुख[4]! किमर्थं लङ्कामधिगतवानसि?।

[चन्द्रराशिः–] इदमादिशन्ति रामभद्रपादाः।

रावणः–(चन्द्रहासं परामृश्य सखेदम्)

कोऽप्यस्ति काननचरः, स च रावणाय क्रुद्धः समादिशति दूतमुखेन कृत्यम्।
श्रीचन्द्रहास! मुषितेन्द्रवधूविलास! दृष्टस्त्वया हतविरिञ्चिविचारसारः॥

१ जानाति। २ सुग्रीवभ्राता। ३ वराकः। ४ वानरः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चन्द्रराशिः-

तस्य प्रियां दशरथस्य वधूं विदेह-
भर्त्तुः सुतामभिरिरंसु पिशाचलोकम्।
श्रीचन्द्रहास! मुषितेन्द्रवधूविलास!
दृष्टं त्वया हतविरिञ्चिविचारसारम्॥ २५॥

रावणः-(सक्रोधम्) अरे! पुनरेवं व्याहर।

(चन्द्रराशिस्तदेव पठति।)

रावणः-

हित्वा वैनयिकं प्रयात रिपुतां, पुष्णीत रोधं पुरे,
वाचालाः स्त, विधत्त दूतललितं, स्वेच्छाऽपराधेषु वः।
सर्वस्यापि विकर्मणो दिविषदां कौपीनदीक्षागुरुः
प्रायश्चित्तमसावसिर्घटयिता श्रीचन्द्रहासो रणे॥ २६॥

[चन्द्रराशेः पश्यतः प्रविश्य वैनतेयः मायापवनञ्जयौ रावणं प्रति सदैन्यम्-]

यद् भग्नं विपिनं, धनुर्धरकलादक्षो यदक्षो[1] हतः,
शिक्षां लम्भयतः क्षपाचरपतेर्यन्मूर्ध्नि दत्तं पदम्।
यद्वेश्मानि परैःशतानि[2] शिशुना क्षुण्णानि कापेयत-[3]
स्तत् क्षन्तव्यमशेषमेष पुरतस्ते देव! बद्धोऽञ्जलिः॥ २७॥

रावणः-(चन्द्रराशिं प्रति) महावीरतनय! किमादिशन्ति रामभद्रपादाः?।

चन्द्रराशिः-इदमादिशन्ति रामभद्रपादाः-

रक्षोवंशभुवामकृत्यकरणं वेषो न दोषस्ततः
सत्यं ते वयमन्यदारहरणं नानौचितीं ब्रूमहे।
सीतां मुञ्च शराः खरान्वयमुषो विश्रान्तिमातन्वता-
मस्तु स्वस्ति, निशाचरेषु वहतां मन्दोदरी मण्डनम्॥ २८॥

रावणः-

अस्तु स्वस्ति, निशाचरेषु वहतां मन्दोदरी मण्डनम्,
वैदेहीपरिरम्भनिर्भरभुजो धत्तां मुदं रावणः।
सन्तु म्लेच्छशिशोः सवानरचमूचक्रस्य रक्ताऽऽसवै-[4]
र्लङ्काक्रीडगृहेषु[5] पङ्कजदृशामापानकेलिक्रमाः॥ २९॥

चन्द्रराशिः-(साक्षेपम्)

सन्तु म्लेच्छशिशोः सवानरचमूचक्रस्य पण्यस्त्रियां
लङ्काक्रीडगृहेषु सीधुसलिलैरापानकेलिक्रमाः।
पौलस्त्यस्य शिरोभिरस्तु दशभिः सौमित्रिपत्रिक्षतैः
किष्किन्धापुरगोपुरेषु विगलद्रक्षोरणं तोरणम्॥ ३०॥

---

१ अक्षनामा पुत्रः। २ शतात् पराणि परःशतानि, शतादय इति निपात्यन्ते। ३ "कपेः क्रीडादिकं किञ्चित् कापेयमिति कथ्यते"। ४ मद्यैः। ५ उद्यानेषु।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[रावणेन त्रिजटाअनुचरीमालतीपार्श्वान्मायामैथिलीरूपं कारयित्वा चन्द्रराशेः पश्यतस्तत्र सभायामागच्छत इदं वाक्यम् -]

आरोहन्ति दुरारोहं मार्गं मुञ्चन्ति दूरतः ।
योषितः कामिनामर्थे शाखिनामिव वीरुधः ॥ ३१ ॥

पुना रावणः-(सोपहासम्) चन्द्रराशे ! अर्पयिष्यामो जानकीम् । जानकीजानिर्देवो रामभद्रः किमपरमादिशति ? ।

चन्द्रराशिः-(सावष्टम्भम्) जानकीजानिर्देवो रामभद्र इदमपरमादिशति-

उदस्तः कैलासो यदथ, शतमन्योर्व्यपहृतः
स्मयः सङ्ग्रामे यत्, तदिह ननु साक्षी कथय कः ? ।
प्रतीमो[1] निःशेषं खरकुलनिवापप्रतिभुवां[2]
शराणां रे रक्षस्त्वमसि परिसोढा यदि युधि ॥ ३२ ॥

(चन्द्रराशिर्निष्क्रान्तः ।)

रावणः-(कर्णं दत्त्वा ससम्भ्रमम्)

लङ्कायाः किमुरे ! बहिः कलकलः ?

प्रतीहारः- **प्राप्तो रिपुः**

रावणः-(सावज्ञम्) **किं शुना-**

शीरः कोऽप्यपरो ?

प्रतीहारः- **न, काननचरः,**

रावणः-(सलज्जम्) **हुं मा पुरो व्याहृथाः ।**

(पुनः सविनयम्)

दोर्दण्डाः ! समुपस्थितं किमपि वः पर्व त्रपापिच्छिलं,
स्मर्त्तव्योऽस्मदनुग्रहेण विजयो नैन्द्रः क्षणं सम्प्रति ॥ ३३ ॥

(प्रविश्य सम्भ्रान्तः)

शुकनाशः-देव ! राम-कुम्भकर्णयोः शक्रजित्-सुग्रीवयोरपरेषां रक्षसां वनौकसां च महान् समरसंरम्भो वर्त्तते ।

रावणः-(सरोषम्) किमद्यापि प्रहस्तः पुष्पकं प्रगुणयति ? ।

(नेपथ्ये)

इदं प्रगुणमेव पुष्पकम्, आरोहतु देवः ।

रावणः-(प्रतीहारं प्रति) दर्शय मार्गम्, येन समराय संरम्भामहे ।

(इति निष्क्रान्ताः सर्वे ।)

॥ इति पञ्चमोऽङ्कः ॥

---

१ प्रतिपद्यामहे । २ "निवापः पितृतर्पणम्" ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अथ षष्ठोऽङ्कः ॥

जाम्बवन्तः—समाकर्णितपूर्वया कृतमपरया कथया, कथय तावत्, भवन्तमुपलभ्य प्रथमं किमजनि रजनिचरचक्रवर्त्तिनः ? ।

चन्द्रराशिः—

साकूतं किमपि[1] प्रदीप्तमपरं[2] दोलायितं किञ्चन[3]
स्तब्धं किञ्चन[4] किञ्चन प्रहसितं[5] किञ्चित् त्रपापांसुरम्[6] ।
किञ्चिद् विस्मित[7]मन्यदुन्नत[8]मवाक्[3] किञ्चित्[9] किमप्युत्सुकं[10]
मामालोक्य दशापि रावणमुखान्याप्तानि भिन्नां स्थितिम् ॥ १ ॥

(नेपथ्ये)

हा वत्स त्रिभुवनैकमल्ल ! हा सोडीरकुञ्जर ! ।

जाम्बवन्तः—(सभायाम्) **गोमुख ! किमिदम् ? ।**

गोमुखः—(सास्रम्) **दिव्यशक्त्या शक्त्या रावणेन लक्ष्मणो वक्षसि ताडितः ।**

(ततः प्रविशति राम-सुग्रीवाभ्यां दत्तहस्तावलम्बः शक्तिसक्तवक्षा लक्ष्मणः, बिभीषण १ अङ्ग २ अङ्गद ३ हनूमन्त ४ पवनञ्जय ५ चन्द्रराशि ६ कुन्द ७ कुमुद ८ गवयु ९ गवाक्ष १० प्रभृतयो वनौकसश्च ।)

जाम्बवन्तः—(सुग्रीवं प्रति) **व्यूहमध्यमध्यास्तां कुमारः ।**

जाम्बवन्तः—(विमृश्य) **अरे ! कपिवीराः कियन्तो विपन्नाः ? ।**

वानरः— **चतुर्दशायुतानि** । (इत्यभिधाय निष्क्रान्तः ।)

रामः—वत्स ! **किं बाधते ? ।**

लक्ष्मणः—(मन्दस्वरम्) **न किञ्चित् ।** (पुनरपवार्य सुग्रीवं प्रति)

वाचः स्खलन्ति गात्राणि शुष्यन्ति भ्रश्यति श्रुतिः ।
याति ध्यामलतां दृष्टिः श्रोत्रं श्रोतुं न काङ्क्षति ॥ २ ॥

रामः—वत्स ! **किं बाधते ? ।**

(लक्ष्मणः वेदनामभिनीय तूष्णीमास्ते ।)

रामः—(सास्रम्) ।

धीरोत्तंस ! पराक्रमैकशरणे, धौरेय ! तेजस्विनां,
स्थाम्नां धाम !, कृतज्ञविज्ञगरिमावास ! प्रवास ! द्विषाम् ।
गम्भीर ! प्रतिपन्नवत्सल ! महात्यागिन् ! शरण्याग्रिम !
ज्येष्ठे क्रन्दति बान्धवे मयि निजे दृष्ट्या प्रसीद क्षणम् ॥ ३ ॥

---

1 धूसरम् । 2 ऊर्ध्वमुखम् । 3 अधोमुखम् । 4 दशभिः सहस्रैः एकमयुतम्, १४००००० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संरब्धे प्रतिपन्थिनि प्रतिदिशं वाचंयमो मास्म भूः,
सन्तप्तान् हृदयङ्गमेन वचसा सन्तर्पयास्मान् क्षणम्[1] ।
हेवाकः क्व स ते जगत्त्रयभयप्रत्यासदीक्षोन्मुखः[2] ?
क्वायं वीरमृगाङ्क ! कातरकलाशाली रणानुद्यमः ? ॥ ४ ॥

लक्ष्मणः-हनूमन् ! सतूणीरं[3] चापं सूर्यहासं चोपानय ।

हनूमन्-इदम् ।

लक्ष्मणः-बिभीषण ! पाणी मे योजय ।

(बिभीषणस्तथा करोति ।)

लक्ष्मणः-

भ्रातः कार्मुकदण्ड ! मित्र शरधे ! श्रीसूर्यहास प्रभो !
क्षन्तव्यं विनयक्रमातिपतनं कार्यः प्रयत्नस्तथा ।
आर्यः प्रीणयते यथा जनकजामस्मान् धिगात्मम्भरीन्
प्रीणात्येष बिभीषणः खलु यथा लङ्काधिपत्यश्रियम् ॥ ५ ॥

रामः-(ससम्भ्रमम्) वत्स ! किं त्वां व्यथयति ? ।

लक्ष्मणः-आर्य ! चरणाम्भोजप्रणयप्रवासो मां व्यथयति ।

रामः-(साक्षेपम्)

धिग् वाचस्तव मङ्गलप्रशमिनीरिक्ष्वाकुवंशाशिव-
क्षोदिन्यः प्रणयप्रवासविपदं देव्यो हरिष्यन्ति नौ ।
सोढव्यः स पुनर्निमील्य नयने कालः करालाकृति-
र्यावद्वत्स ! करोति हेतिपटलैर्मां भस्मसात् पावकः ॥ ६ ॥

बिभीषणः-प्रतिहतममङ्गलम् ।

जाम्बवन्तः-देव ! कोऽयं त्रिभुवनामङ्गलप्ररोहहेतुर्व्याहारः ? ।

रामः-अमात्य !

विनाऽप्याज्ञां राज्ञः किल रघुपतेः काननमयं
मया सार्द्धं[4] वत्सः सहजविनयादेव समगात् ।
परे लोके यात्रां विदधतममुं यद्यहमनु-
व्रजेयं नो पूष्णः[5] कुलमपतुलं स्यान्मलिनितम् ॥ ७ ॥

[लक्ष्मणस्य शक्तिभेदितस्य रामं प्रति मुत्कलापनवाक्यम्-]

शुश्रूषाश्रमतो जडत्ववशतश्चापल्यतो बाल्यतो
वैयात्येन[6] भुजामदेन ललितारम्भेण मान्द्येन वा ।

---

१ शीतलीकुरु । २ निराकरण । ३ सभस्त्रं कोदण्डम् । ४ सूर्यस्य कुलम् । ५ सेवाखेदात् । ६ धार्ष्ट्येन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाक्चेतस्तनुभिर्यदस्मि विनयभ्रंशस्पृहां लीढवान्[1],
आर्येण प्रियबान्धवेन विधुरे तन्मर्षणीयं मयि ॥ ८ ॥

(रामः सास्रं प्रलपति ।)

बिभीषणः—*समाश्वसिहि, समाश्वसिहि ।*

रामः—(सगद्गदम्)

भ्रातर्मां व्यसनाब्धिमग्नमधुना हातुं न ते युज्यते
त्वद्दोर्दण्डबलेन राक्षसकुले ख्यातोऽस्म्यहं विक्रमी ।
द्राग् निद्रां तदिमां विमुञ्च यदहं न्यासीकृतस्तेऽम्बया
बाष्पाऽव्यक्तगिरा वनाय चलतस्तद् वत्स! किं विस्मृतम्? ॥९॥

लक्ष्मणः—(सक्रोधम्)

आर्य! ब्रूहि क एष कातरदशाशंसी शुचां सङ्ग्रहो?
दैन्यं मास्म कृथा वृथा गिरि हहा! ज्येष्ठ कठोरं वचः ।
धिग् मां वैनयिकातिपातनिरतं कस्कोऽत्र भोः! सत्वरं
लीढाग्नीः समिधः समाहर हरे[2] येनाऽऽत्मनः कल्मषम्[3] ॥ १० ॥

लक्ष्मणः—(आत्मानं प्रति)

नाऽऽकीर्णा दशकन्धरी पलभुजां पत्युः सितैः[4] पत्रिभि-[5]
र्दत्ता नापि बिभीषणाय सुहृदे लङ्काधिपत्यस्थितिः ।
वैदेहीविरहाग्निमग्नमनसो नाऽऽर्यस्य सन्दर्शिता
जातं जन्म वृथा हहा! रणधुराधौरेयदोष्णोर्मम ॥ ११ ॥

रामः—(सबाष्पम्)

तात! त्रातः! सुभटसुभग! प्रीणयन्त्यौ त्रिलोकी-
मेकं वारं क्षिप मयि दृशावेष बद्धोऽञ्जलिस्ते ।
ज्येष्ठे बन्धौ प्रलपति पुरो दीनदीनैर्वचोभिर्-
भ्रातर्भ्रातः! स्वपिषि[6] समरे दीर्घया निद्रया किम्? ॥ १२ ॥

बिभीषणः—(साक्षेपं रामं प्रति)

दुःखयत्यस्तसम्बन्धान् बन्धुमृत्युर्मुनीनपि ।
प्रेमावनद्धमनसः किं पुनर्गृहमेधिनः? ॥ १३ ॥

रामः—(सास्रम्)

योद्धारो रणरङ्गमल्लकपयः काङ्क्षन्ति ते विक्रमं
शेषे तात! किमद्य राक्षसचमूचक्रे युधं क्रामति ।

---

१ कृतवान्। २ अपनयामि। ३ पापम्। ४ तीक्ष्णैः। ५ बाणैः। ६ स्वपिषि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्तिष्ठ स्मर रक्षसो दशमुखीसंहारिणं पत्रिणं
वैदेही यदियं हृता परिभवः सोऽयं न वत्सस्य किम्? ॥ १४॥

रामः – (सवैकल्यम्) तर्हि यावन्निद्रायति कुमारस्तावदहं पितृभ्यो गत्वा समरसङ्कथां विज्ञपयामि ।

(पुनर्लक्ष्मणं प्रति)

वत्स ! त्वां समरे विहाय निहतं यातेन[1] तां स्वां पुरीं
मातुस्त्वन्मुखवीक्षणोत्सुकदृशः किं ब्रूहि वाच्यं मया ? ।
व्यक्तं मे वदनं न पश्यति पुरा बन्धुक्षयाधायिनः
कौशल्याऽपि रघूद्भवः किमपरं ? सर्वोऽपि लज्जिष्यते ॥ १५ ॥

मातः ! क्षत्रियपक्षपातनिरते भूदेवते ! भ्रातरौ
सूर्याचन्द्रमसौ ! सखे ग्रहगण ! व्यालम्ब्य लम्बां कृपाम् ।
लङ्कां दत्त विभीषणाय, दिशत क्षेमाणि सौमित्रये,
भिक्षां प्राणमयीं प्रयच्छत शुचा क्षामाय रामाय च ॥ १६ ॥

(नेपथ्ये)

शक्तिप्रोतमवेक्ष्य लक्ष्मणमयं वक्षःकपाटोदरं
देवः श्रीरघुसन्ततिप्रसविता प्रम्लानवक्त्राम्बुजः ।
शल्योद्धारविधायिनीं मृगयितुं स्फूर्जत्प्रभामौषधिं
कामप्यञ्चति पश्चिमाचलवनक्षोणिं प्रभाणां पतिः ॥ १७ ॥

जाम्बवन्तः – शुभोदर्कं[2] मागधः पठितवान् । तदिदानीं शुचमपहाय क्षणं सङ्ग्रामश्रमोऽतिवाह्यताम् ।

रामः – यदावेदयति मन्त्री तदस्तु ।

(निष्क्रान्ताः सर्वे ।)

॥ इति षष्ठोऽङ्कः ॥

---

१ गतेन । २ "उदर्कस्तद्भवं फलम्" ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अथ सप्तमोऽङ्कः ॥

(ततः प्रविशति रावणः सीता-त्रिजटे मालतीप्रभृतिकश्च परिवारः ।)

रावणः –

दुष्कीर्त्तिर्नयलङ्घिनां निरुपमः कोऽपि स्तनाडम्बरो
लोकः शोकपरः पुरस्य कटिरि ! स्फारा नितम्बस्थली ।
ज्ञातेयं जनता जहाति पुरतो वाचां सुधा सा मुधा
धर्मध्वंसकृतामधोगतिरसून् धिग् मे विना जानकीम् ॥ १ ॥

(विमृश्य) त्रिजटे ! क्लेशकण्टकिलेऽपि जानकीसम्पर्कपर्वणि कथङ्कारमतितरामुत्कण्ठते दशकन्धरस्य चेतः ? ।

त्रिजटा – [1]भट्टा !

सयणं विसमं हिअयं ससज्झसं संगमो विरलविरलो ।
अवरु च्चिअ को वि रसो तह वि हु पच्छन्नसुरयस्स ॥ २ ॥

चन्द्रराशिः – (रावणं प्रति) देव ! विशल्याकरस्पर्शेन निःशल्यवक्षा लक्ष्मणः समजनि ।

रावणः – (साक्षेपम्)

स्थेयान् कल्पय संकथामधिवपुः कोऽयं पृथुर्वेपथुः ?
शक्तिर्लक्ष्मणवक्षसो निरगमन्नो रक्षसां वक्षसः ।
[3]भूयासुर्जयिनश्चिरं [4]सुरसमित्पौरोगवा बाहवो
लङ्केन्द्रस्य पुनर्द्विषां दलयिता श्रीचन्द्रहासो मदम् ॥ ३ ॥

(नेपथ्ये)

कृत्याकृत्यविचारसारविदुरोऽप्यामुष्मिकानैहिकान्
प्रत्यूहान् कलयन्नपि स्वचरितैर्भूम्ना विषीदन्नपि ।
किञ्चित् प्रेम तदाऽऽविरस्ति गहनं सा चेन्द्रियाणां स्थितिः
काऽपि स्वैरचरी यतः श्लथयति न्यायस्य मुद्रां जनः ॥ ४ ॥

---

1) भर्त्तः ।

शयनं विषमं हृदयं ससाध्वसं सङ्गमो विरलविरलः ।
अपर एव कोऽपि रसः तथापि खलु प्रच्छन्नसुरतस्य ॥ २ ॥

---

१ ज्ञातिकर्म । २ कम्पः । ३ सन्तु । ४ देवसमराध्यक्षाः, प्रचण्डा इति तात्पर्यम् । ५ प्रकटीभवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मयः—(मन्दोदरीं प्रति) वत्से !

उल्लुण्ठवण्ठनटपेटकसूत्रधारः
सीतास्वयङ्ग्रहमहग्रहिलः पतिस्ते ।
अस्मादृशां किमधुना मधुना[1] समिद्ध-
कामेन्धनान्धलमतिः स गिरः शृणोति ? ॥ ५ ॥

मयः—(रावणं प्रति)

न खलु तनुते देवः कीर्त्तेरनौपयिकीः[2] क्रियाः
स्वयमपि ततो वाच्यं किञ्चिच्चकास्ति न मादृशाम् ।
उचितमनिशं श्रोतुं भूम्ना नया-ऽनयदृश्वनां,
तदपि जरतां रक्षोवंशप्रियङ्करिणीर्गिरः ॥ ६ ॥

मारीचः—

विन्दन्तु सौहार्दमथाप्यसौहृदं
महीभुजः स्वैरविहारचेतसः ।
अतामसीमर्हति[3] शंसितुं पथैः
परो रजोभिः सचिवः पुनः क्रियाम् ॥ ७ ॥

रावणः—(सप्रमोदम्)

यथारुचितमुच्यतां किमसुखाकरं वर्त्मनः ?
प्रियाकरमुपासितुं प्रवयसां वयं कर्मठाः ।
हठादपि निषादिनो गजमिवोन्मदिष्णुं नृपं
प्रतीपयितुमुत्पथादनिशमीशते[4] मन्त्रिणः[5] ॥ ८ ॥

मयः—देव ! सीतापहारमतितरां जुगुप्सते लङ्कालोकः ।

रावणः—(सावहेलम्)

अविदितपथः प्रेम्णां बाह्योऽनुरागरुजां जडो
वदतु दयितामैत्रीवन्ध्यो यथाप्रतिभं जनः ।
मम पुनरियं सीता राज्यं सुखं विभवः प्रियं
हृदयमसवो मित्रं बन्धू रतिर्धृतिरुत्सवः ॥ ९ ॥

(पुनः सखेदम्) आर्य ! किमेकमस्य पामरप्रकृतेर्लङ्कालोकस्य विचारचातुरीवैमुख्यमुद्भावयामि ? ।

अस्यां प्रेमगमेव वाग्मनसयोरुत्तीर्णमन्यस्य चेद्
वैदेह्यां नयनैकलेह्यलवणप्रारोहभूमौ भवेत् ।
कापेयं परिरभ्य स प्रकटयन्नुल्लुण्ठभूयं हठात्
किञ्चित्कामितमादधीत कृतवान् वेधास्तु मां रावणम् ॥ १० ॥

---

१ वसन्तेन । २ न उपायेभ्यो हिता अनौपयिकी । ३ तमोरहिताम् । ४ निवर्त्तयितुम् । ५ समर्था भवन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपरथा पुनरार्य ! –

अहंयुनिकराग्रणीरवगणय्य धर्मार्गलां
प्रसह्य यदि जानकीमभिरमेत लङ्कापतिः ।
अमुष्य ननु रोदसीविजयजिष्णुदोष्णः समि-
न्मृगव्यरसिकस्तदा क इह नाम वैतण्डिकः ? ॥ ११ ॥

अनुचितमिदं विन्द्याल्लोकश्रिरादयशो दिशो
व्यथयतु नयभ्रंशादास्तां जगद् ग्रहिलेन्द्रियम् ।
बलपरिमलक्रीतीं स्वर्भूर्भुवस्त्रितयीं पुनः
बहुतृणमहं मन्ये सीतामुखेन्दुवियोजितः ॥ १२ ॥

मारीचः –

खण्डय न्यायतेजोभिः शौर ! कौलीनदुर्दिनम् ।
अनीतिधूमरी हन्ति यशश्चूताग्रमञ्जरीम् ॥ १३ ॥

मयः –

प्रसृमरबलिबन्धो भूर्भुवःस्वस्त्रयेऽस्मि-
न्नमरनगरनाथोन्माथवाणिज्यजन्म ।
परयुवतिरिरंसाघोरहञ्जीरबन्धै-
र्विधुरयसि मुधैव स्वं यशो हा ! किमेतत् ? ॥ १४ ॥

रावणः – (सरोषम्)

परयुवतिरसाविति प्रलापो
नियतमयं तव विस्रसाप्रमादः ।
उदवहमहमेव पूर्वमेतां
ननु मनसा शबरः करेण पश्चात् ॥ १५ ॥

मयः – (सविनयम्)

अस्मत्प्रार्थनया, कलङ्कभयतः, सन्न्यायरक्षाकृते,
धर्मध्वंसविमर्शनात्, किमपरं ? शत्रोः प्रतापेक्षणात् ।
रक्षःसन्ततिराक्षसीं जनकजां मुञ्च, प्रसादं कुरु,
भ्रातस्ते विहितोऽञ्जलिः, किमु नयस्येतां क्षयं बन्धुताम् ? ॥ १६ ॥

रावणः – (सरोषसम्भ्रमम्)

अपात्रं शत्रूणां त्रिदशपुरवीरस्मयचय-
व्ययद्यूतक्रीडासभिकतरवारिर्दशशिराः ।

---

१ अहङ्कारि । २ युद्धाखेटक । ३ निवारकः । ४ तृणसदृशाम् । ५ जनप्रवादमेघतिमिरम् । ६ "जीर्णोऽथ विस्रसा जरा" ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खलूक्त्वा[1] वैदेहीत्यजनमषडक्षीणमपरं[2]
किमप्यार्यः कार्यं दिशतु नयवाचालहृदयः ॥ १७ ॥

(पुनः सदर्पम्)

न मर्त्यो दैत्यो वा त्रिदश इति वा ज्ञातुमुचितो
दशग्रीवस्तेजःप्रकृति परमं ब्रह्म किमपि ।
तदेतस्मै हेलातुलितगुरुशैलाय शबर-
प्रतापप्रागल्भीप्रथनमखिलं भस्मनि हुतम् ॥ १८ ॥

(नेपथ्ये)

परोलक्षाः क्षुण्णा रजनिचरवीरैः कपिभटाः
कनीयांसं शक्तिर्यमशरणमाधत्त शबरम् ।
निजामिच्छां म्लेच्छेऽप्रथयदथ वर्षीयसि शिखी
प्रतापप्रागल्भी कटरि ! हरिजेतुर्[3]विजयते ॥ १९ ॥

रावणः –(समाकर्ण्य सहर्षविषादम्)

सुधासारैः सिञ्चन् श्रुतिकुवलयान्याभ्युदयिकै-
रकस्मादस्माकं तिलकयति शौर्यं किमपि कः ? ।
हहा ! नीचैर्वृत्तिः सुरनगरलुण्टाकमहसो
दशग्रीवस्यायं वनचरजयः कः परिपणः[4] ? ॥ २० ॥

[सुकेतोः पार्श्वाद् रावणेन कारितमिदं कूटं विभीषणवाक्यम् ।]

सेवाश्राद्धसुपर्वकोटिमुकुटप्रग्रीववैहासिका[5]
ग्लानिं वैनयिकस्य कौणपपतेः पादाः सहन्तां मयि ।
येषां सङ्गरसंयतप्रियतमत्राणाय याञ्चानम-
त्पौलोमीतिलकोऽत्यजन्मृगमदो रक्षामषीलाञ्छनम् ॥ २१ ॥

मयः –(सोरस्ताडमुच्चैःस्वरम्)

लङ्कां त्रिःसप्तकृत्वः[7] प्रतिदिशमरयोऽरौत्सुरण्डीरदोष्णः[8]
काण्डीरान्[9] कान्दिशीकान् कृषत विषमयान् लुण्टयामासुराशु ।
गोष्ठे शूरत्वमेवं पुनरसिकुहनाताण्डवैर्नर्त्तयन्तः
कष्टं कष्टं हताः स्मः समजनि रजनीचारिवंशो निरंशः[11] ॥ २२ ॥

रावणः –(सखेदम्)

दर्पं संवृणु चन्द्रहास ! रभसः कोऽयं भ्रुवोर्भ्रूकुटौ[12] ?
हेवाकं विजहीत विश्वविजितौ नाद्यापि किं बाहवः ? ।

---

१ अलं वैदेहीत्यजनस्य वचनेन । २ षड्भिर्नयनैर्दृश्यं रहस्यं षडक्षीणम्, तद्विपरीतमषडक्षीणम् । ३ रावणस्य । ४ गर्वः । ५ देव । ६ मुकुटशिखर । ७ एकविंशतिवारान् । ८ रुद्धितवन्तः । ९ समर्थबाहून् । १० धनुष्मतः । ११ निरवयवः । १२ भ्रकुटिविषये ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तां लङ्कामरुधन् पुलीन्द्रकपयः त्रिःसप्तकृत्वः पति-
वीरम्मन्यभुजोन्मदिष्णुहृदयो यस्याः स्वयं रावणः ॥ २३ ॥

(पुनः सोपशमम्) आर्य! शान्तो भूत्वा नियोजय, किमावहामः[1]?।

मयः—

मुच्यतां मैथिली, सन्धिः सार्द्धमस्तु रघूद्भवा।
भवतु स्वस्ति लङ्कायै, ज्ञातयः सुखमासताम् ॥ २४ ॥

रावणः—(मन्दोदरीं प्रति)

इहाऽऽनीता सीता यदनुचितमेकं तदभवद्,
द्वितीयं यद् भर्त्तुर्न पुनरुपनीता वनजुषः।
इदं तार्त्तीयीकं[2] भवति पुररोधप्रतिभिया
समर्प्यैतां सन्धिं घटयति यदीशः पलभुजाम् ॥ २५ ॥

अपि च देवि!

खड्गबिम्बच्छलाद् यस्य स्वात्मैवाधिमृधं[3] द्विषन्।
निष्ठितारिः स सन्धत्ते रावणः किं वनेचरान्? ॥ २६ ॥
प्रत्यग्रयौवनभुजार्गलसाहसिक्य-
कन्थाभिराभिरलमद्य पटच्चरीभिः[4]।
उद्बुद्धवार्द्धकभिदेलिमबाहुदण्ड-
षण्डोचितं किमपि वृत्तमुदाहरस्व ॥ २७ ॥

मन्दोदरी—(रावणस्य पादौ शिरसि निधाय सदैन्यम्) [1]अज्जउत्त! जं तादो विन्नवेदि तं पडिवज्जसु।

रावणः—देवि! मुञ्च मुञ्च, प्रतिपन्नस्ते कदाग्रहः। (पुनः सोपशमम्) कस्कोऽत्र?

(प्रविश्य)

कुन्दः—आदिशतु देवः।

रावणः—

व्रज कुन्दः! सन्धिघटनाहेतोः
(पुनः सरोषं चन्द्रहासं परामृश्य)
अरे मां शठः!
शौर्यात् कोऽश्लथयत्[5]?

(मयादयः सर्वे सभयं तिरोदधते।)

1) आर्यपुत्र! यद् भ्राता विज्ञपयति तत् प्रतिपद्यस्व।

१ किं कुर्मः?। २ तृतीयम्। ३ अधिमृधिं-अधिसङ्गरम्। ४ जीर्णाभिः। ५ श्लथमकरोत्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रावणः – (पार्श्वतो विलोक्य)

कथं न सविधे कोऽप्यस्त्यहं केवलः ।

(सवितर्कम्)

कोऽहम् ?

(विनिश्चित्य)

हुं ननु रावणः

(सविमर्शम्)

किमिदम् ?

(विनिश्चित्य)

आः ! सन्धापरैः

(सगर्वम्)

रावणः

सन्धत्ते द्विषतः

(सनिर्वेदम्)

प्रतीच्छति न किं ? काङ्क्षन् प्रियां जानकीम् ॥ २८ ॥

[खण्डितवृत्तमिदं काव्यम् ।]

क्रूरः – देव ! प्रतिपक्षभयाकुलमवेक्ष्य राजकुलं शक्रपदातयः स्वं बन्दिलोकमपहृत्य गताः ।

रावणः – (साक्षेपम्)

दशास्ये दास्याय स्पृहयति विदेहेन्द्रदुहितुः
स शक्रः स्वं लोकं हरति, हरतां, किन्नु रुचिरम् ? ।
कृतार्थे त्वेतस्मिन्नमरनगरी किञ्चिदपि यद्
विगाहेत स्वास्थ्यं तदथ यदि चक्रं कलयति ॥ २९ ॥

रावणः – (मयं प्रति साक्षेपम्)

"दशास्ये दास्याय स्पृहयति विदेहेन्द्रदुहितुः" ।

पश्चादपि सन्धानमाधास्यामः । साम्प्रतं पुनः –

त्वं तूर्णमानुपदिकं[1] त्रिदिवाङ्गनानां
श्रीकुम्भकर्णमुत शक्रजितं विधेहि ।
येन क्षिपाचरपतेः पुरुहूतकान्ता-
हञ्जीरहेषितसुधां श्रुतयः पिबन्ति ॥ ३० ॥

(पुनः क्रूरं प्रति सदर्पम्) मास्म विषादनिषादं स्पृश ।

---

१ अनुपदं चरतीति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुरसमरसरस्वत्कर्णधारे कुमारे
हरिजिति यदि वा श्रीकुम्भकर्णेऽभ्यमित्रे ।
पुनरमरवधूटीघोरहङ्गीरहेषा-
कवचनिचुलिताङ्गी गुप्तिरन्धम्भविष्णुः ॥ ३१ ॥

ह्यस्तने समरसंरम्भे कुमारः शक्रजित् कुम्भकर्णश्च वनेचर कपिभिर्नियम्य गृहीतौ ।

(इति श्रवणानन्तरम्)

रावणः – (सखेदम्)

हुं शक्रः स जितो जितो धृतधृतः कैलासशैलोऽम्बरे
क्रान्तं क्रान्तमिदं जगत् प्रतिभटप्रावासिकैर्बाहुभिः ।
येयं बन्धु-तनूजबन्धनकथा लङ्कापतेर्जीवतः
कर्णेषु प्रथते किमेकमनयाऽगीतं न विस्फूर्जितम् ? ॥ ३२ ॥

(पुनः साक्षेपम्)

याञ्चां संवृणु देवि ! दुर्दमधुराधुर्यस्य लङ्कापते-
र्वीरस्याऽसि सधर्मिणी करुणया किं बान्धवद्वेषिणि ? ।
ज्वालामांसलचन्द्रहासकुलिशव्यालीढकण्ठस्थला-
दुत्कृत्तस्य वनान्तचारिशिरसः सन्धिं विधातास्महे ॥ ३३ ॥

(पुनरूर्ध्वमवलोक्य साशङ्कम्)

केशाकेशि किमम्बरे दिविषदां स्थानार्थिनां ? मागधैः
प्रेर्यन्ते किमभिक्रमार्थमधिकं रक्षश्चमूचारिणः ? ।
आश्वीयस्य च हास्तिकस्य च रजः काष्ठाः स्तृणीते कथं ?
कस्मात् कावचिकान्यहम्प्रथिमिकां साङ्ग्रामिकीं बिभ्रति ? ॥ ३४ ॥

(नेपथ्ये)

वीरास्त्रस्यत रे ! रणं सुरवधूनेत्रप्रियम्भावुकः
स्कन्धाभोगभयङ्करो रघुपतिः सोऽयं स्वयं क्रामति ।
यद्बाणाशनिदक्षिणेर्मधमनीनिष्ठ्यूतरक्तारुणं
भूयोऽपि ग्लपयाञ्चकार मरुतस्तत् कौम्भकर्णं वपुः ? ॥ ३५ ॥

सीता – (सहर्षम्) [1]तिअडे ! अज्जउत्तवन्नणासवणेण चिरा निव्वाविदु म्हि ।

1) त्रिजटे ! आर्यपुत्रवर्णनाश्रवणेन चिराद् निर्वापिताऽस्मि ।

१ समुद्रः । २ अयशः । ३ केशैश्च केशैश्च प्रहृत्य युद्धं वृत्तं केशाकेशि । ४ विक्रमार्थम् । ५ अश्वानां समूह आश्वीयम् । ६ दिश आच्छादयति । ७ कावचिकानां समूहाः । ८ अप्रियः प्रियो भवति । ९ "दक्षिणेर्मा तु समृगो यो व्याधैर्दक्षिणे क्षतः" । १० नाडी । ११ निर्गत । १२ क्षयमनयत् । १३ वातान् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रावणः- (सक्रोधम्)

चक्रं चक्रमरे!

(पुनः सखेदम्)

मनुष्यनिहतौ धिग्मां समुत्कन्धरं,

(सविमर्शरोषम्)

वैदेहीं स्पृहयालुरेष हतको, केयं तदस्मिन् कृपा?।

(सवितर्कभयम्)

एतस्मिन्नुपसंहृते किमपि सा कापेयमाधास्यते,

(विनिश्चित्य)

सीताजीवितजीवितस्य तदयं मृत्युर्ममोपस्थितः ॥ ३६ ॥

॥ इति सप्तमोऽङ्कः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अथाष्टमोऽङ्कः ॥

सारणः –(सविषादम्)

ये सदा सरुजो ये च भृत्या भृत्यद्विषि प्रभौ ।
जीवितं मरणं तेषां मरणं जीवितं पुनः ॥ १ ॥

(नेपथ्ये)

[1]परमत्थं मंतेसि ।

अंधाण दरिद्दाण य परव्वसाणं च वाहिआणं च ।
जं चिरकालं जीयं तं खलु पावस्स माहप्पं ॥ २ ॥

(ततः प्रविशति रावणो रथेन प्रहस्तप्रभृतिकश्च परिवारः ।)

रावणः –(समन्तादवलोक्य)

प्राचीनमञ्चति वियत् पृथुशोककोक-
कान्ताकपोलपुलकौपयिकं दिनेशः ।
श्रान्ता इवास्ततटकुट्टिममाश्रयन्ते
राजीवजीवितहृतो हरिणाङ्कपादाः ॥ ३ ॥

प्रहस्तः – देव ! किमप्यद्भुतं वर्त्तते । तथाहि मनुजमात्रविजयेऽपि तर्जितवास्तोष्पतेर्लङ्कापतेः –

तुष्टं[1] रुष्टं[2] मुदासि[3] सत्वर[4] मवा[5] गुत्तान[6] मार्त्तं[7] दृढं[8]
मुग्धं[9] रौद्र[10] मतन्द्रि[11] खेदि[12] विशदं[13] ताम्रं[14] विशालं[15] कृशम्[16] ।
स्फारव्रीड[17] महंयुतापरवशं[18] हिंस्रं[19] कृपापक्ष्मलं[20]
चक्षुर्विंशतिसंख्यमेतदभवच्चित्रं विरुद्धस्थिति ॥ ४ ॥

रावणः –(सविषादावष्टम्भम्)

विजेतुर्जम्भारिं मनुजपृथुकस्यापि विजये
दृशो नानाभावान् दधति यदरिष्टं किमपि तत् ।
अरिष्टानि स्युर्वा कति न सुकृतानां प्रतिभवं
परीपाकप्राप्ये जनकपतिपुत्रीपरिचये ॥ ५ ॥

[राम-लक्ष्मणौ प्रति रावणः सावहेलम् –]

अरे म्लेच्छौ ! को वां जनकतनयाजानिरनिशं
विजिज्ञासुः सोऽहं द्रुतमथ भवन्तौ विवृणुताम् ।
दशास्यात् त्रस्यन्ती यमधिमनसं ध्यायति मुदा
सदा सा वैदेही स हि कृतधियां द्रष्टुमुचितः ॥ ६ ॥

---

1) परमार्थं मन्त्रयसि ।
अन्धानां दरिद्राणां च परवशानां च व्याधितानां च ।
यत् चिरकालं जीवितं तत् खलु पापस्य माहात्म्यम् ॥ २ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लक्ष्मणः - (साधिक्षेपम्) अरे पारदारिक !

नृपतिविनतिशिक्षासत्रदीक्षापवित्र-
स्त्रिजगदभयदुर्गं जानकीजानिरेषः ।
अनधिगतचराणां कौतुकी बन्धनानां
यमधिरणमपश्यत् कुम्भकर्णोऽपि वीरः ॥ ७ ॥

रावणः - (अनाकर्णितकेन रामं प्रति) अरे वनेचर ! विरम विरम समरसंरम्भात् । न खलु पात्रं लङ्कापतिर्मर्त्यविक्रमाणाम् ।

आसन्नैकोनविंशैः क्षितिभृति गगनान्तर्धृते येन दोर्भिः
सौधप्रग्रीवमालाकरणिमुपनवान्याननानि श्रयन्ते ।
तस्मिंस्त्रैलोक्यवीरस्मयविजयमयीमभ्यमित्रप्रशस्तिं
बिभ्राणे स्वर्गराजोऽप्यजनि बहुरजः किं पुनर्मर्त्यडिम्भः ? ॥८॥

लक्ष्मणः - (सोपहासम्)

विगाढान्तःसारः स जगति कुबेरक्षितिधरः,
पिशाचः सावज्ञं क्षिपति यमभिव्योम भुजया ।
पिशाचोऽपि ज्ञातः स च विकचवीरव्रतचण-
स्तदुत्क्षेपेणापि स्पृशति हृदि दर्पं किमपि यः ॥ ९ ॥

रावणः - अरे कूपकच्छप ! अनभिज्ञोऽसि दाशकन्धरीणां वीरचर्याणाम् ।

अनिमिषभूयमनिन्दन् मघवा यदसिस्फुलिङ्गनिचिताक्षः ।
एकधुरस्तस्य पुरः समराङ्गणरङ्गिणः कः स्यात् ? ॥ १० ॥

रामः - (सावहेलम्)

जीर्यन्मर्कटखेटलुण्टितभुजव्यूहावलेपेन यः
क्रव्यादेन नियम्य चारककुटीक्रोडाकुटुम्बीकृतः ।
सुत्रामा हतकः स नाकखलपूस्तत्क्षेपंगभैरथो
काकुस्थेषु किमेषु रोहति चमत्काराङ्कुरः स्फूर्जितैः ? ॥ ११ ॥

रावणः - (चन्द्रहासं परामृश्य) अरे अलीकभुजशौण्डीर्यदर्प ! वृथा आत्मानमुपसंहरसि ।

न शक्तिः सौमित्रिं यदकृत कृतान्तप्रणयितां
नियन्त्री तत्राभूज्जनकपतिपुत्रीविधुरता ।

---

१ आसन्ना एकोनविंशतिर्येषाम्, विंशतिरित्यर्थः । २ कैलाशे । ३ कपिशीर्षकश्रेणिसादृश्य । ४ उप - समीपे नव येषां तानि उपनवानि, दश इत्यर्थः । ५ ईषत् परिसमाप्तं रजो बहुरजः । ६ अन्तर्निर्भरः । ७ कैलाशः । ८ जीर्यता - वृद्धेन मर्कटखेटेन - अधमेन वालिना लुण्टितो भुजव्यूहाऽवलेपो - गर्वो यस्य स तेन । ९ इन्द्रः । १० तस्य - इन्द्रस्य क्षेपः - निन्दा गर्भे येषां तैः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृपाणः क्षुन्दानः पुनरयमरातीनपघृणः
श्वृणिर्निस्त्रिंशानां जगति भवितुं कः परिवृढः? ॥ १२ ॥

रामः-(सकरुणमिव) अरे पारदारिक! वीरसारमेय!

चापाचार्यकमेष लक्ष्मणभुजः सन्तन्य नाडिन्धमै-
र्यावन्नास्थिघनाः कषत्युपनवाः कण्ठस्थलीः सायकैः।
तावन्मुञ्च पिशाचिकां रणरसोदन्यां वराकी सुत-
व्यापत्तिव्यसनानभिज्ञनयना सन्तिष्ठतां कैकसी ॥ १३ ॥

रावणः-(सरोषम्) अरे म्लेच्छाधम! दशकन्धरस्य मातरमधिक्षिपसि?। गृहाण शस्त्रम्। इदानीमेष न भवसि।

(नेपथ्ये)

विरम विरम बन्धो! साहसिक्यादमुष्माद्
विमृश रघुषु कस्ते शस्त्रहेवाकपाकः?।
अमरनगरलक्ष्मीलुण्टनाढ्यम्भविष्णुः
क्षितिवलयविहारी हार्यते किं प्रतापः? ॥ १४ ॥

रावणः-कथमयं बान्धवाधमो दुरात्मा बिभीषणो मां दशकन्धरमनुशास्ति?।

(पुनरुच्चैः स्वरम्)

आः पाप! ज्ञातिहत्यानिचुलितवदन! भ्रातृबन्धोः स्ववंश-
प्रभ्रंशस्थूललक्ष! श्रुतिषु मम गिरः पांशुराः किं तनोषि?।
रे रे! सोदर्य! लज्जाज्वरविधुरभुजो रावणस्त्वां तितिक्षु-
र्ज्वालाजिह्वालधारस्त्वयि पुनरनुजे चन्द्रहासो नृशंसः ॥ १५ ॥

(आकाशे)

अलं संरम्भेण त्यजत समराडम्बररुजं
यदर्थं क्लेशोऽयं तदभवदपन्थाः खलु दृशाम्।

रामः-(ससम्भ्रमम्) वत्स लक्ष्मण! किमिदम्?।

लक्ष्मणः-देवीवागियम्?।

रामः-किमर्थमयमस्माकं क्लेशः?।

लक्ष्मणः-सीतार्थम्।

रामः-तत् किं सीता दृशामपन्थाः?।

लक्ष्मणः-स्फुटं नावगच्छामि।

[एतान्येव वाक्यानि रावणस्य प्रहस्तं प्रति।]

---

१ अङ्कुशः। २ श्वा। ३ आचार्यकर्म। ४ बाणैः। ५ आच्छादित। ६ सहिष्णुः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(पुनराकाशे)

स एवैकः श्लाघ्यो रघुपतिरसौ यस्य विरहे
हहा हा ! वैदेही तृणमिव जहौ जीवितमपि ॥ १६ ॥

रामः—हा प्रिये वैदेहि ! क्वासि ? । देहि मे प्रतिवचनम् । (इति मूर्छति ।)

(सुग्रीव-हनूमदादयश्चन्दनादीन् कुर्वन्ति ।)

रावणः—(रामं प्रति सगर्वम्)

अनायुधकरं परं सुरपुरन्ध्रिहास्यद्रुहो
निहन्तुमधिसङ्गरं न खलु शिक्षिता बाहवः ।
धनुः स्मर धनुः स्मर द्रुतमतः परं प्राणित-
प्रथां न तव मृष्यते शबरडिम्भ रे ! रावणः ॥ १७ ॥

रामः—(साक्षेपम्)

रे रे क्रव्यादखेट ! प्रतिसुभटघटागर्वसर्वङ्कषाणां
काकुस्थानां समीके[1] प्रहरणविरहं बाहवः किं श्रयन्ते ? ।
एते सन्त्येव देवद्विरदमदमुषः कुम्भकर्णस्य मैत्र्या
लब्धास्वादाः पलादास्रजि[2] तव रुधिरं पातुमुत्काः पृषत्काः[3] ॥१८॥

रावणः—(चन्द्रहासमादाय)

रुन्धानो व्योमरन्ध्रं स्फुरदनलकणैर्दक्षिणेर्माणि मर्मा-
ण्यातन्वानस्त्रिलोकीवलयभुजभृतां दुर्निवारैः प्रहारैः ।
पायं पायं वनान्तश्चररुधिरजलान्यस्तु धाराकरालः
कल्पान्तभ्रान्तकालभ्रकुटिसहचरश्चन्द्रहासो महासिः ॥ १९ ॥

माल्यवान्—वत्स !

विरञ्चिः संसोढा न च चिरमपारस्य महसो
न च ग्लानेः पात्रं समरभुवि लङ्कापरिवृढः ।
तदेतन्निःशङ्कं द्वयमपि न विद्मः पुनरिदं
विरञ्चिः साधीयान्[4] ? किमयमुत लङ्कापरिवृढः ? ॥ २० ॥

शुकः—आर्य ! खुरलीदुर्ललितयो राम-रावणयोः कस्य विजयं वितर्कयसि ? ।

माल्यवान्—

यः स्त्रीमात्रकृते तृणं मृगयति स्वर्भूर्भुवो वैभवं
सन्तः पामरमुद्गणन्तु तमुत प्रारब्धनिर्वाहिणम् ।
जानीमः पुनरेतदेव हि वयं युद्धाध्वरश्रोत्रियो[5]
नासीन्नास्ति न वा भविष्यति दशग्रीवात् प्रवीरोऽपरः ॥ २१ ॥

---

१ सङ्ग्रामे । २ असृजि—रुधिरे । ३ बाणाः । ४ अतिशयेन साधुः । ५ युद्धयज्ञकुशलाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[राक्षसेन माल्यवतः कथितं यद् रामेण रावणश्चक्रावशेषायुधः कृतः।]

माल्यवन्तः—(सखेदम्)

न वीरः पौलस्त्यात् पर इति कृपाणव्रणमयी
प्रशस्तिः पोलोमीपतितनुनिषण्णा विवृणुते।
असावप्याप्नोति व्यसनमधियुद्धं यदि तदा
श्रियो यातायातप्रकृतिरचिकित्स्या[1] विजयते ॥ २२ ॥

(नेपथ्ये)

अक्षतस्यैव सौमित्रेश्चक्रं यत् करमागमत्।
तज्ज्ञाने दशकण्ठस्य कण्ठच्छेद उपस्थितः ॥ २३ ॥

(पुनराकाशे।)

मध्येऽम्भोधि बभूव विंशतिभुजं रक्षो दशास्यं पुन-
स्तत्पातालमही त्रिविष्टपभटांश्चक्राम दोर्विक्रमैः।
मर्त्यस्तस्य मृणालतन्तुतुलया चिच्छेद कण्ठाटवीं
वैराग्यस्य च विस्मयस्य च पदं रामायणं[2] वर्त्तते ॥ २४ ॥

माल्यवन्तः—(सास्रम्)

क्व च स्वर्गाधीशस्मयविजयचञ्चुर्दशमुखः?
क्व च क्रीडाकारी शबरपृथुकाभ्यां परिभवः?।
न यो वाचः पात्रं भवति न दृशोर्नापि मनस-
स्तमप्यर्थं क्रुद्धो हतविधिरकाण्डे घटयति ॥ २५ ॥

(नेपथ्ये)

मन्दं मन्दमयं जयन्त[3]विहितालम्बो हरिः शृङ्खला-
व्याजिह्मांह्रिरुपैति[4] राघवमभि व्रीडानमत्कन्धरः।
भूयोऽपि त्रिदिवं नयन्ति मुदिताः स्वःसिन्धुरोच्चैःश्रवः-
स्वर्गास्त्रा-ऽभ्रमु[6]-कल्पपादप-निजप्रेयस्विनीः स्वर्गिणः ॥ २६ ॥
निर्माय प्रतिवीरविक्रमकथावन्ध्यां त्रिलोकीमिमां
वक्षश्चारकचारिणीं भगवतीं साम्राज्यलक्ष्मीं व्यधात्।
स्त्रीहेतोश्च चकार सङ्गरमखे स्वैर्दक्षिणां मूर्द्धभिः
सार्द्धं यः स पुनर्महार्घ्यमहिमा कोऽन्यो दशग्रीवतः? ॥ २७ ॥

---

१ अप्रतीकार्या। २ रामस्य अयनं चरितलक्षणं रामायणम्। ३ इन्द्रपुत्रः। ४ सङ्कुचितपदः। ५ वज्रम्। ६ ऐरावतकलत्रम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रामः–(सविनयरोमाञ्चं सीतां प्रति)

प्राणान् यद् विरहेऽप्यहं विधृतवान् देवि ! प्रियप्राणित-
स्तत् क्षन्तव्यमशेषमेष मम यः स्मेराक्षि ! नैव क्षुधाम् ।
सौमित्रेः कपिभर्त्तुरस्य च मनःप्रीत्यैव देहि प्रिये !
हस्तिस्कन्धमलङ्कुरुष्व ननु ते पूर्णः प्रतिज्ञाविधिः ॥ २८ ॥

सुग्रीवः–देव ! किं ते भूयः प्रियमनु(?मुप)करोमि ? ।

रामः–किमतः परमपि मे प्रियमस्ति ? ।

जाम्बवन्तः–देव ! तथापीदमस्तु–

कल्याणं भूर्भुवः स्वः प्रसरतु विपदः प्रक्षयं यान्तु सर्वाः
सन्तः श्लाघां लभन्तामपचयमयतां दुर्मतिर्दुर्जनानाम् ।
धर्मः पुष्णातु वृद्धिं प्रलयमनुकलं कल्मषानि व्रजन्तु
प्राप्य स्वातन्त्र्यलक्ष्मीमनुभवतु मुदं शाश्वतीं रामचन्द्रः ॥ २९ ॥

(इति निष्क्रान्ताः सर्वे ।)

॥ इति अष्टमोऽङ्कः ॥



॥ समाप्तोऽसौ रघुविलासनाटकस्योद्धारः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org